Soon after Gen-ku's death, however, some of his other disciples founded their own sects, of which two are now in existence under the same name of *[illegible]*, or 'Sect of the Pure Land.' The founders of these two sects are *Ben-a*, of the *Kin-zei-ha*, or Sect of the Western Island, where he lived; and *Shô-ku*, of the *Sei-zan-ha*, or *Sect of the Western [illegible] near Kioto. Ben-a died in A.D. 1238, and Shiô-ku in 1247*[1].

Although Gen-ku established the principal sect of the doctrine of the Pure Land, his leading opinions were almost forgotten after his death. But in A.D. 1224, i.e. the thirteenth year from his death, his

[1] [illegible], fasc. 5, fol. 9 b.

greatest disciple, Shin-ran, established his sect, with the view of maintaining the principles of his teacher Gen-ku. Shin-ran called his sect Zio-dô-shin-shiu, or True Sect of the Pure Land, now shortened into Shin-shiu, or True Sect. In the same year he compiled a work, collecting numerous maxims and adding short but important notes. Shin-ran was born in the noble family of Hino in Kioto, in A.D. 1173. In his ninth year, A.D. 1181, he became a priest of the Ten-dai sect, which he left in his twenty-ninth year, A.D. 1201. Then he became a disciple of Gen-ku, and shared the misfortune of the latter in his thirty-fifth year, A.D. 1207, when he was exiled to the province of Yechigo. Five years after he was set free, and he travelled through the north-eastern provinces during twenty years preaching the doctrine of the Pure Land. He was in his fifty-second year when he established his sect. After that he wrote several books, both in Chinese and Japanese, in which he firmly established his system of teaching faith and morality equally, while prohibiting strictly all kinds of superstitious practices. In A.D. 1262, Shin-ran died, when he was ninety years of age. Before and after his death, his disciples and descendants (as he was a married priest) have constantly gone to different places and made the True Sect of the Pure Land known to the people. There are many works on the life of Shin-ran.

There is another and still later sect of this doctrine of the Pure Land, called Zi-shiu, or Sect which performs worship at fixed times—six times in a day and night. It was founded by the Japanese priest Ippen, in A.D. 1276, who died in 1289[1].

Besides the above four sects, viz. Yu-dzû-nen-butsu-shiu, Zio-do-shiu, Shin-shiu, and Zi-shiu, there is another sect called Ten-dai (Thien-thai, in Chinese sound), which also holds the doctrine of 'the Pure Land,' while in the six remaining Buddhist sects, still existing in Japan, this doctrine is generally not taught.

The following two tables will show the result of the religious census of 1880, with the dates of the establishment of the eleven Buddhist sects in Japan.

The number of the Shinto temples and of the preachers and students professing the Shinto faith, has been added for the sake of comparison. The Shinto temples in Japan are numerous, but the number of preachers and students is comparatively small.

[1] Butsu zô dzu i, 6.

I. SHINTÔIST AND BUDDHIST TEMPLES (YASHIRO AND TERA RESPECTIVELY) IN JAPAN.

Sect.	Date	Number.	Total.
Shintô	. . . .	. .	186,702
1. Hossô . .	First established about A.D. 660, but included in the Shin-gon from A.D. 1872 to 1882		
2. Ten-dai[1] . .	A.D. 805 .	4,785	72,158
3. Shin-gon .	" 816 . .	12,928	
4. Yu-dzû-nen butsu[1]	" 1127 .	362	
5. Zô-dô[1]. .	" 1174, or about 1220	8,314	
6. Rin-zai .	" 1191 . . .	6,155	
7. Shin-shu[1] .	" 1224 . .	19,208	
8. Sô-tô . .	" 1227	14,334	
9. Nichi-ren	" 1253 . .	4,970	
10. Zi-shu[1]	" 1276 . .	525	
11. Wô-baku .	" 1654 . .	577	

[1] Nos. 2, 4, 5, 7, 10 are the sects among which the doctrine of the Pure Land is wholly or partially taught.

2. SHINTÔIST AND BUDDHIST PREACHERS AND STUDENTS.

Sect.	Preachers		Students		
	Male	Female	Male	Female	Total.
Shintô	21,311	110	1,493	68	1,561
1. Hossô					
2. Ten-dai . .	4,694	60	808	18	826
3. Shin-gon . .	9,335	71	1,957	18	1,975
4. Yu-dzû-nen butsu .	296	13	111	8	119
5. Zô-dô	12,427	209	2,188	418	2,606
6. Rin-zai . .	5,919	135	1,256	157	1,413
7. Shin-shu . . .	24,699	2	5,194	.	5,194
8. Sô-tô .	16,093	620	3,098	692	3,790
9. Nichi-ren .	5,370	78	1,202	30	1,232
10. Zi-shu .	497	8	103	. .	103
11. Wô-baku .	478	17	99	. .	99
	99,112	1,313	17,709	1,409	19,918

[illegible]

॥ सुखावतीव्यूहः ॥

ओँ नमो रत्नत्रयाय[1]। ओँ नमः श्रीसर्वबुद्धबोधिसत्त्वेभ्यः। नमो दशदिगनंतापर्यंतलोकधातुप्रतिष्ठितेभ्यः सर्वबुद्धबोधिसत्त्वार्यश्रावकप्रत्येकबुद्धेभ्योऽतीतानागतप्रत्युत्पन्नेभ्यः। नमोऽमिताभाय[4]। नमोऽचिंत्यगुणांतरात्मने[5]॥

नमोऽमिताभाय जिनाय ते मुने।
सुखावतीं यामि ते चानुकंपया॥
सुखावतीं कनकविचित्रकाननां।
मनोरमां सुगतसुतैरलंकृतां॥
तवाश्रयं[7] प्रथितयशस्य धीमतः।
प्रयामि तां बहुमणिरत्नसंचयां॥

एवं मया श्रुतं। एकस्मिन्समये भगवान् राजगृहे[8] विहरति स्म गृध्रकूटपर्वते महता भिक्षुसंघेन सार्धं द्वात्रिंशता भिक्षुसहस्रैः सर्वैरर्हद्भिः क्षीणास्रवैर्निःक्लेशैरुषितवद्भिः सम्यगाज्ञासुविमुक्तचित्तैः परीक्षचित्तैः परिक्षीणभवसंयोजनैरनुप्राप्तस्वकार्थैर्विजितवद्भिरुत्तमदमथ[11]प्राप्तैः सुविमुक्तचित्तैः सुविमुक्तप्र-

[1] In B only. [2] म left out in A [3] मु left out in A. [4] P adds नमोऽमितायुषे. [5] गुणाकरात्मने A. C. गुणोदरात्मने B. गुणाकरात्मने P [6] मम A. C. मम B. [7] तवाश्रयं A. तवाश्रयं P. तवाश्रया B. तवा श्रयात् C. ...नु॰! [8] ...नगरे C [10] परीक्ष॰ A C P परिक्ष B [11] दमशमथ P. दमशमथ C. B

ह्रैर्महानागैः षडभिज्ञैर्वशीभूतैरष्टविमोक्षध्यायिभिर्बलप्राप्तैरभि-
ज्ञानाभिज्ञैः स्थविरैर्महाश्रावकैः । तद्यथा । आज्ञातकौंडिन्येन१
चाश्वजिता२च वाष्पेण३च महानाम्ना४च भद्रजिता५च यशोदे-
वेन६च विमलेन७च सुबाहुना८च पूर्णमैत्रायणीपुत्रेण९चो-
रुबिल्वाकाश्यपेन१०च नदीकाश्यपेन११च गयाकाश्यपेन१२
च कुमारकाश्यपेन१३च महाकाश्यपेन१४च शारिपुत्रेण१५च
महामौद्गल्यायनेन१६च महाकौष्ठिल्येन१७च महाकफिलेन१८
च महाचुंदेन१९चानिरुद्धेन२०च नंदिकेन२१च कंपिलेन२२च
सुभूतिना२३च रेवतेन२४च खदिरवनिकेन२५च वकुलेन२६च
स्वागतेन२७चामोघराजेन२८च पारायणिकेन२९च पत्केन३०च
[illegible]केन३१च नंदेन३२च राहुलेन३३चायुष्मतानंदेन च३४ ।
[illegible]भिज्ञाताभिज्ञैः स्थविरैर्महाश्रावकैरेकं पुद्गलं स्थाप-
यित्वा [illegible]शैक्षगोत्रं यदिदमायुष्मंतमानंदं । मैत्रेय-
प्रमुखैश्च [illegible] बोधिसत्त्वैर्महासत्त्वैः ॥१॥

अथ [illegible]आयुष्मानानंद उत्थायासनादेकांसमुत्तरासंगं कृत्वा
[illegible] पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनांजलिं
[illegible]भगवंतमेतदवोचत । विप्रसन्नानि तव भगवत इंद्रियाणि

[illegible]

॥ सुखावतीव्यूहः ॥

परिशुद्धच्छविवर्णः पर्यवदातो सुवर्णः पीतनिर्भासः। तद्यथापि नाम शारदं बदरं[1] पांडु परिशुद्धं पर्यवदातं पीतनिर्भासं एवमेव भगवतो विप्रसन्नानींद्रियाणि परिशुद्धो सुखवर्णः पर्यवदातच्छविवर्णः पीतनिर्भासः। तद्यथापि नाम भगवञ्जांबूनदसुवर्णनिष्को दक्षेण कर्मारेण कर्मारांतवासिना[2] वोल्कामुखेन[3] संप्रवेश्य सुपरिनिष्ठितः पांडुकंबल उपरिनिक्षिप्तो ऽतीव परिशुद्धो भवति पर्यवदातः पीतनिर्भासः एवमेव भगवतो विप्रसन्नानींद्रियाणि परिशुद्धो मुखवर्णः पर्यवदातच्छविवर्णः पीतनिर्भासः। न खलु पुनरहं भगवन्नभिजानामीतः पूर्वतरमेवं विप्रसन्नानि तथागतस्येंद्रियाण्येवं परिशुद्धं मुखवर्णं पर्यवदातं छविवर्णं पीतनिर्भासं। तस्य मे भगवन्नेवं भवति बुद्धविहारेण बताद्य तथागतो विहरति जिनविहारेण सर्वज्ञताविहारेण महानागविहारेण बताद्य तथागतो विहरति अतीतानागतप्रत्युत्पन्नान्वा तथागतानर्हतः सम्यक्संबुद्धान्समनुस्मरतीति। एवमुक्ते भगवानायुष्मंतमानंदमेतदवोचत्। साधु साध्वानंद किं पुनस्ते देवता एतमर्थमारोचयंत्युताहो बुद्धा भगवंतः स्वयं तेन प्रत्युत्पन्नमीमांसाज्ञानेनैवं प्रजानासीति। एवमुक्त आयुष्मानानंदो भगवंतमेतदवोचत्। न मे भगवन्देवता एतमर्थमारोचयंति नापि बुद्धा भगवंतः स्वयं तर्हि मे भगवंस्तेनैव प्रत्यात्ममीमांसाज्ञानेनैवं भवति बुद्धविहारेणाद्य तथागतो विह-

[1] बदरं P. बदर A. बद B. deest in C.
[2] कर्मारांतवासिना A. B. C. कर्मा-
रांतवासिनोव P.
[3] Lal. VIII 4, 18
[4] मुखे C.
[5] नि A. P. C. See, however,

रति जिनविहारेण सर्वज्ञताविहारेण वताद्य तथागतो विहरत्यतीतानागतप्रत्युत्पन्नान्वा बुद्धान्भगवतः समनुस्मरतीति। एवमुक्ते भगवानायुष्मंतमानंदमेतदवोचत्। साधु साध्वानंदोदारः खलु त उन्मिंजो भद्रिका मीमांसा कल्याणं प्रतिभानं बहुजनहिताय त्वमानंद प्रतिपन्नो बहुजनसुखाय लोकानुकंपायै महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च यस्त्वं तथागतमर्थं परिप्रष्टव्यं मन्यसे। एवमेव भगवत्स्वानंदस्तथागतेष्वर्हत्सु सम्यक्संबुद्धेष्वप्रमेयेष्वसंख्येयेषु ज्ञानदर्शनमुपसंहरेन्न तथागतस्य ज्ञानमुपहन्येत। तत्कस्य हेतोः। अप्रतिहतहेतुज्ञानदर्शनो ह्यानंद तथागतज्ञान आकांक्षन्नानंद तथागत एकपिंडपातेन कल्पं वा तिष्ठेत्कल्पशतं वा कल्पसहस्रं वा कल्पशतसहस्रं वा यावत्कल्पकोटीनियुतशतसहस्रं[1] वा ततो वोत्तरि तिष्ठेत्[2] न च तथागतस्येंद्रियाण्युपनश्येयुर्न मुखवर्णस्यान्यथात्वं भवेन्नापि छविवर्ण उपहन्येत। तत्कस्य हेतोः। तथा ह्यानंद तथागतः समाधिमुखपारमिताप्राप्तः। सम्यक्संबुद्धानामानंद लोके सुदुर्लभः प्रादुर्भावः। तद्यथोदुंबरपुष्पाणां लोके प्रादुर्भावः सुदुर्लभो भवति एवमेवानंद तथागतानामर्थकामानां हितैषिणामनुकंपकानां महाकरुणाप्रतिपन्नानां सुदुर्लभः प्रादुर्भावः। अपि तु खल्वानंद तथागतस्यैव सोऽनुभावो[3] यस्त्वं[4] सर्वलोकाचार्याणां सत्त्वानां लोके प्रादुर्भावाय बोधिसत्त्वानां महासत्त्वानामर्थाय तथागतमेतमर्थं

[1] From कल्पशतं to सहस्रं deest in C. B., and कोटीनियुत stands in P. only. [2] उत्तरितेत् A. P., deest in C. B. [3] अनुभाव C. P. निभार A निर्भाय B. [4] यस्त्वं ?

परिप्रष्टव्यं मन्यसे। तेन ह्यानंद शृणु साधु च सुष्ठु च मनसिकुरु। भाषिष्येऽहं ते । एवं भगवन्नित्यायुष्मानानंदो भगवतः प्रत्यश्रौषीत् ॥२॥

भगवानानंदमेतदवोचत् । भूतपूर्वमानंदातीतेऽध्वन्यतीतेऽसंख्येये कल्पेऽसंख्येयतरे विपुलेऽप्रमेयेऽचिंत्ये यदासीत्तेन कालेन तेन समयेन दीपंकरो नाम तथागतोऽर्हन्सम्यक्संबुद्धो लोक उदपादि। १दीपंकरस्यानंद परेण परतरं२प्रतापवान्नाम तथागतोऽभूत्। तस्य परेण परतरं३प्रभाकरो नाम तथागतोऽभूत्। तस्य परेण परतरं४चंदनगंधो नाम तथागतोऽभूत्। तस्य परेण परतरं५सुमेरुकल्पो नाम तथागतोऽभूत् । एवं चंदनो६नाम विमलाननो नाम७अनुपलिप्तो नाम८विमलप्रभो नाम९ नागाभिभूर्नाम१०सूर्यानंदो नाम११गिरिराजघोषो नाम१२मेरुकूटो नाम१३सुवर्णप्रभो नाम१४ज्योतिष्प्रभो नाम१५वैडूर्यनिर्भासो नाम१६ब्रह्मघोषो नाम१७चंद्राभिभूर्नाम१८सूर्यघोषो' नाम१९मुक्तकुसुमप्रतिमंडितप्रभो नाम२०श्रीकूटो नाम२१सागरवरबुद्धिविक्रीडिताभिज्ञो नाम२२वरप्रभो नाम२३महागंधराजनिर्भासो नाम२४व्यपगतखिलमलप्रतिघोषो नाम२५शूरकूटो नाम२६रत्नंजहो' नाम२७महागुणधरबुद्धिप्राप्ताभिज्ञो नाम २८चंद्रसूर्यजिह्मीकरणो नाम२९उत्तप्तवैडूर्यनिर्भासो नाम३०चित्तधाराबुद्धिसंकुसुमिताभ्युद्गतो नाम३१पुष्पावतीवनराजसंकुसुमि-

[1] नागाभिभू A. B. P. नाभिभू C. नागाभिभू Chin. transl. [2] C. inserts वैडूर्यप्रभ.
[3] सूर्ये° P. धूर्ये° B. [4] मुक्त° P. [5] रत्नजहो A. P.

खिलदोषाञ्जाला अतोऽधिकालं ॥३॥
अथ बुद्धबला[2] अनंततेजा।
प्रतपति सर्वदिशा नरेंद्रराजा।
तथ अहु बुद्ध भवि[3] धर्मस्वामी।
जरामरणात्मजां प्रमोचयेयं ॥४॥
दानशमथशीलक्षांतिवीर्यं।
ध्यानसमाधितश्चैव[4] अग्रश्रेष्ठां[5]।
एभि अहु व्रतां समाददामि।
बुद्ध भविष्यमि सर्वसत्त्वत्राता ॥५॥
बुद्धशतसहस्रकोट्यनेका।
यथरिव वालिक गंगया अनंता।
सर्वत अहु पूजयिष्य नाथां।
शिववरबोधिगवेषको अतुल्यां ॥६॥
गंगारजसमानलोकधातूं।
तत्र भूयोऽंतरि ये अनंतक्षेत्राः।
सर्वत प्रभ मुंचयिष्य तत्र।
इति एतादृश वीर्यमारभिष्य ॥७॥
क्षेत्र मम उदार अग्रश्रेष्ठो।
वरमिह मंडी संस्कृतेऽस्मिं[7]।

[1] यतो पिकालं A. यतो ह्रीपारं P. यतो भिपारं C. ?भिपारं? [2] बला P. बता A. C. [3] भविता A. C. P. [4] समाधितश्चैव A. C. P. [5] र्श्रो A. B. C. P. [6] गता A. गंता B C P. [7] सस्कृते र्स्मि B. C. Several syllables are wanting: we expect some reference to the Bodhimaṇḍala.

असदृश निर्वाणधातुसौख्यं ।
तथ[1] असङ्गतया विशोधयिष्ये ॥८॥
दशदिशत समागतानि सत्त्वाः ।
तत्र गता सुख मे दिशंति क्षिप्रं ।
बुद्ध मम प्रमाणु अत्र शिक्षी ।
अपितवीर्यबलं जनेमि छंदं ॥९॥
दशदिशलोकविदसंगज्ञानी ।
सद मम चित्त प्रजानयंति तेऽपि ।
अविचिगतु अहं सदा वसेयं ।
प्रणिधिबलं न पुनर्विवर्तयिष्ये ॥१०॥४॥

अथ खल्वानंद स धर्माकरो भिक्षुस्तं भगवंतं लोकेश्वरराजं तथागतं संमुखमाभिर्गाथाभिरभिष्टुत्यैतदवोचत्। अहमस्मि भगवन्ननुत्तरां सम्यक्संबोधिमभिसंबोद्धुकामः। पुनः पुनरनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादयामि परिणामयामि। तस्य मे भगवान्साधु तथा धर्मं देशयतु यथाहं क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं। असमसमस्तथागतो लोके भवेयं। तांश्च भगवानाकारान्परिकीर्तयतु यैरहं बुद्धक्षेत्रस्य गुणव्यूहसंपदं परिगृह्णीयां॥ एवमुक्त आनंद भगवाँल्लोकेश्वरराजस्तथागतस्तं भिक्षुमेतदवोचत्। तेन हि त्वं भिक्षो स्वयमेव बुद्धक्षेत्रगुणालंकारव्यूहसंपदं परिगृह्णीष्व। सोऽवोचत्। नाहं भगवंस्तत्महेयं। अपि तु भगवानेव। भाषस्वान्येषां[2] तथागतानां बुद्धक्षेत्रगुणव्यूहालंकार-

[1] तथ ? [2] भाषस्व (येषां A C भाषस्व येषां P भाषस्व ॥ येषां B.

खिलदोषाश्चाद्या अतोऽधिकालं ॥३॥
अथ बुद्धबला[2] अनंततेजा।
प्रतपति सर्वदिशा नरेंद्रराजा।
तथ अहु बुद्ध भवि[3] धर्मस्वामी।
जरामरणाप्रजां प्रमोचयेयं ॥४॥
दानशमथशीलक्षांतिवीर्यं।
ध्यानसमाधितथैव[4] अग्रश्रेष्ठां[5]।
एभि अहु व्रतां समाददामि।
बुद्ध भविष्यमि सर्वसत्त्वत्राता ॥५॥
बुद्धशतसहस्रकोट्यनेका।
यथरिव वालिक गंगया[6] अनंता।
सर्वेत अहु पूजयिष्य नाथां।
शिववरबोधिगवेषको अतुल्यां ॥६॥
गंगारजसमानलोकधातूं।
तत्र भूयोऽंतरि ये अनंतक्षेत्राः।
सर्वेत प्रभ मुंचयिष्य तत्रा।
इति एतादृश वीर्यमारभिष्य ॥७॥
क्षेत्र मम उदारु अग्रश्रेष्ठो।
वरमिह मली संस्कृतेऽस्मिं[7]।

[1] सतो पिकालं A. सतो डोपारं P. सतो मिपारं C. ऽभिपारं? [2] बला P. बरा A. C. [3] भविता A. C. P. [4] समाधितथैव A. C. P. [5] ष्ठां A. B. C. P. [6] गगा A. गंगा B. C. P. [7] सस्कृते स्मिं B. C. Several syllables are wanting, we expect some reference to the Bodhimaṇḍala.

असदृश निर्वाणधातुसौख्यं ।
तथ[1] असस्वतया विशोधयिष्ये ॥८॥
दशदिशत समागतानि सत्त्वाः ।
तथ गता सुख मे दिशंति क्षिप्रं ।
बुद्ध मम प्रमाणु अत्र शिष्टी ।
अवितथवीर्यबलं जनेमि छंदं ॥९॥
दशदिशलोकविदसंगज्ञानी ।
सद मम चित्त प्रजानयंति तेऽपि ।
अविचिगतु अहं सदा वसेयं ।
प्रणिधिबलं न पुनर्विवर्तयिष्ये ॥१०॥४॥

अथ खल्वानंद स धर्माकरो भिक्षुस्तं भगवंतं लोकेश्वरराजं तथागतं संमुखमाभिर्गाथाभिरभिष्टुत्यैतदवोचत् । अहमस्मि भग- वन्ननुत्तरां सम्यक्संबोधिमभिसंबोद्धुकामः । पुनः पुनरनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादयामि परिणामयामि । तस्य मे भग- वाञ्छास्ता तथा धर्मं देशयतु यथाहं क्षिप्रमनुत्तरां सम्यक्संबो- धिमभिसंबुध्येयं । असमसमस्तथागतो लोके भवेयं । तांश्च भगवा- नाकारान्परिकीर्तयतु यैरहं बुद्धक्षेत्रस्य गुणव्यूहसंपदं परिगृह्णी- यां ॥ एवमुक्त आनंद भगवाँल्लोकेश्वरराजस्तथागतस्तं भिक्षुमे- तदवोचत् । तेन हि त्वं भिक्षो स्वयमेव बुद्धक्षेत्रगुणालंकारव्यूह- संपदं परिगृह्णीष्व । सोऽवोचत् । नाहं भगवंस्तत्सहेयं । अपि तु [भ]गवानेव । भाषस्वान्येषां[2] तथागतानां बुद्धक्षेत्रगुणव्यूहालंकार-

[1] तथ !   [2] भाषस्व (येषां A C   भाषस्व येषां P   भाषस्व ॥ येषां B C

खिलदोषाज्ञाद्या अंतोऽधिकालं ॥३॥
अथ बुद्धबला[2] अनंततेजा ।
प्रतपति सर्वदिशा नरेंद्रराजा ।
तथ अहु बुद्ध भवि[3] धर्मस्वामी ।
जरामरणात्मजां प्रमोचयेयं ॥४॥
दानशमपशीलक्षांतिवीर्यं ।
ध्यानसमाधितथैव[4] अग्रश्रेष्ठं[5] ।
एभि अहु व्रतां समाददामि ।
बुद्ध भविष्यमि सर्वसत्त्वत्राता ॥५॥
बुद्धशतसहस्रकोट्यनेका ।
यथरिव वालिक गंगया अनंता ।
सर्वत अहु पूजयिष्य नाथां ।
शिवबरबोधिगवेषकी अतुल्यां ॥६॥
गंगारजसमानलोकधातूं ।
तथ भूयोऽन्तरि ये अनंतक्षेत्राः ।
सर्वत प्रभ मुंचयिष्य तथा ।
इति एतादृश वीर्यमारभिष्य ॥७॥
क्षेत्र मम उदार अग्रश्रेष्ठो ।
वरमिह मंडो संस्कृतेऽस्मिं[7] ।

[1] [illegible] A. [illegible] P. [illegible] C. [illegible] ? [2] बला P. [illegible] A. [3] [illegible] A. C. P. [4] [illegible] A. C. P. [5] [illegible] A. B. C. P. [6] [illegible] A. [illegible] B. C. P. [7] [illegible] B. C. Several syllables are wanting, [illegible]
[illegible]

असदृश निर्वाणधातुसौख्यं ।
तच[1] असत्त्वतया विशोधयिष्ये ॥८॥
दशदिशत समागतानि सत्त्वाः ।
तत्र गता सुख मे दिशंति क्षिप्रं ।
बुद्ध मम प्रमाणु अत्र शिष्टी ।
अचितमवीर्यबलं जनेमि च्छंदं ॥९॥
दशदिशलोकविदसंगज्ञानी ।
सद मम चित्त प्रजानयंति तेऽपि ।
अविचिगतु अहं सदा वसेयं ।
प्रणिधिबलं न पुनर्विवर्तयिष्ये ॥१०॥४॥

अथ खल्वानंद स धर्माकरो भिक्षुस्तं भगवंतं लोकेश्वरराजं तथागतं संमुखमाभिर्गाथाभिरभिष्टुत्यैतदवोचत्। अहमस्मि भगवन्ननुत्तरां सम्यक्संबोधिमभिसंबोद्धुकामः । पुनः पुनरनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादयामि परिणामयामि। तस्य मे भगवान्साधु तथा धर्मं देशयतु यथाहं क्षिप्रमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं। असमसमस्तथागतो लोके भवेयं। तांश्च भगवानाकारान्परिकीर्तयतु येरहं बुद्धक्षेत्रस्य गुणव्यूहसंपदं परिगृह्णीयां ॥ एवमुक्त आनंद भगवाँल्लोकेश्वरराजस्तथागतस्तं भिक्षुमेतदवोचत्। तेन हि त्वं भिक्षो स्वयमेव बुद्धक्षेत्रगुणालंकारव्यूहसंपदं परिगृह्णीष्व। सोऽवोचत्। नाहं भगवंस्तत्सहेयं। अपि तु भगवानेव। भाषस्वान्येषां[2] तथागतानां बुद्धक्षेत्रगुणव्यूहालंकार-

[1] तच ? [2] भाषस्व । येषां । C भाषस्व येषां P भाषस्व ॥ येषां B

[illegible] परिकुरविमाम इति । [illegible]
[illegible] भिउरात्तं
[illegible]
[illegible] सतिर्दतां संग्रक-
[illegible]
[illegible] दिता । परिपुलोणवति-
[illegible] ॥ ११ ॥

[illegible]

[illegible]

एवमुक्त आनंद स लोकेश्वरराजस्तथागतस्तं भिक्षुमेतदवोचत्। तेन हि भिक्षो भाषस्वानुमोदते तथागतः। अयं कालो भिक्षो प्रमोदय पर्षदं हर्षं जनय सिंहनादं नद यं श्रुत्वा बोधिसत्त्वा महासत्त्वा एतर्ह्यनागतेऽध्वन्येवंरूपाणि बुद्धक्षेत्रगुणसंपत्तिप्रणिधिस्थानानि परिग्रहीष्यंति[1] ॥ अथानंद स धर्माकरो भिक्षुस्तस्यां वेलायां भगवंतमेतदवोचत्। तेन हि शृणोतु मे भगवान्ये मम प्रणिधानविशेषाः। यथा मेऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्याचिंत्यगुणालंकारव्यूहसमन्वागतं तद्बुद्धक्षेत्रं भविष्यति ॥७॥

॥१॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रे निरयो वा तिर्यग्योनिर्वा प्रेतविषयो वासुरो वा कायो[2] भवेन्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२॥ सचेन्मे भगवंस्तस्य तत्र बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजाता भवेयुस्ते पुनस्ततश्च्युत्वा निरयं वा तिर्यग्योनिं वा प्रेतविषयं वासुरं वा कायं[3] प्रपतेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३॥ सचेन्मे भगवंस्तत्र बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजातास्ते च सर्वे नैकवर्णाः स्युर्यदिदं सुवर्णवर्णा मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रे देवानां च मनुष्याणां च

[1] P. and C. add परिपूरयिष्यंति. A and B परिगृही°. C. परिगृह्णीष्यंति. P परिगृहि°, and so generally. [2] वाऽसुरो वासुरकायो A. B. C. वा असुरो वासुरका P. [3] वाऽसुरं वासुरकायं A. B. वा असुरं वा कायं P. C. See chap. 15. The reference to the Asuras is left out in three of the Chinese translations in both places. Suras or Devas could hardly be mentioned here with Asuras. See, however, the 4th Praṇidhâna.

संपदं यां श्रुत्वा वयं सर्वाकारं परिपूरयिष्याम इति । अथानंद स लोकेश्वरराजस्तथागतोऽर्हन्सम्यक्संबुद्धस्तस्य भिक्षोराशयं ज्ञात्वा परिपूर्णां वर्षकोटीमेकाशीतिबुद्धकोटीनियुतशतसहस्राणां बुद्धक्षेत्रगुणालंकारव्यूहसंपदं साकारां सोद्देशां सनिर्देशां संप्रकाशितवानर्थकामो हितैष्यनुकंपकोऽनुकंपामुपादाय बुद्धक्षेत्रानु[illegible] [illegible] महाकरुणां संजनयित्वा । परिपूर्णाश्चत्वारिं[illegible] [illegible] भगवतस्तथागतस्यायुष्प्रमाणं ॥५॥

[illegible] धर्माकरो भिक्षुर्यांस्तेषामेकाशीतिबुद्धको[illegible] [illegible] बुद्धक्षेत्रगुणालंकारव्यूहसंपदस्ताः सर्वा [illegible] भगवतो लोकेश्वरराजस्य तथागतस्य [illegible] [illegible] कृत्वा तस्य भगवतोऽतिकाया[illegible] [illegible] बुद्धक्षेत्रगुणालंकारव्यूहसंपदमुदा[illegible] [illegible] [illegible] परि[illegible] [illegible] ॥६॥

[illegible] भगवता लोकेश्वरराजेन तथागतेन [illegible] बुद्धक्षेत्रगुणालंकारव्यूहसंपत्तिः कथिता [illegible] बुद्धक्षेत्रसंपत्तिः परिगृहीता [illegible] [illegible] [illegible] गर्भितं[illegible] [illegible] बुद्धक्षेत्रगुणालंकारव्यूहसंपदिति ॥

[illegible]

॥९॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजायेरंस्ते सर्वे न परचित्तज्ञानकोविदा भवेयुरन्तशो बुद्धक्षेत्रकोटीनियुतशतसहस्रपर्यापन्नानामपि सत्त्वानां चित्तचरितपरिज्ञानतया मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥१०॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजायेरंस्तेषां काचित्परिग्रहसंज्ञोत्पद्येतान्तशः स्वशरीरेऽपि मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥११॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजायेरंस्ते सर्वे न नियताः स्युर्यदिदं सम्यक्त्वे[1] यावन्महापरिनिर्वाणे मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥१२॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रेऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य कश्चित्सत्त्वः श्रावकाणां गणनामधिगच्छेदन्तशस्त्रिसाहस्रमहासाहस्रपर्यापन्ना अपि सर्वसत्त्वाः प्रत्येकबुद्धभूताः कल्पकोटीनियुतशतसहस्रमभिगणयन्तो मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥१३॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रेऽनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य प्रमाणिकी मे प्रभा भवेदन्तशो बुद्धक्षेत्रकोटीनियुतशतसहस्रप्रमाणेनापि[2] मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥१४॥ सचेन्मे भगवन्ननुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य

[1] See Childers s. v. [illegible] [2] प्रमानेनापि P. प्रमानापि A. B. प्रमाणमपि C.

नानात्वं प्रज्ञायेतान्यच[1] नाम संवृतिव्यवहारमात्रा[2] देवमनुष्या इति संख्यागणनातो मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं॥

॥५॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजातास्ते च सर्वे नर्द्धिवशितापरमपारमिताप्राप्ता भवेयुरंतश एकचित्तक्षणलवेन बुद्धक्षेत्रकोटीनियुतशतसहस्रातिक्रमणतयापि मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥६॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजाता भवेयुस्ते च सर्वे जातिस्मरा न स्युरंतशः कल्पकोटीनियुतशतसहस्रानुस्मरणतयापि मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥७॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजायेरंस्ते सर्वे न दिव्यस्य चक्षुषो[3] लाभिनो भवेयुरंतशो लोकधातुकोटीनियुतशतसहस्रदर्शनतयापि मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥८॥ सचेन्मे भगवंस्तस्मिन्बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजायेरंस्ते सर्वे न दिव्यस्य श्रोत्रस्य लाभिनो भवेयुरंतशो बुद्धक्षेत्रकोटीनियुतशतसहस्रादपि युगपत्सद्धर्मश्रवणतया मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

[1] प्रज्ञायते P. प्रज्ञापेत् A. प्रज्ञापयत् B प्रज्ञपेत् C [2] संवृत्ति A. संवृत्ति B संव्रसंवृत्ति P. C. [3] The Praṇidhâna with regard to the divyam kakshuḥ is placed by A. B. in chap. 6, between तथागतस्य and पादौ, beginning with the words स्मरणतयापि and going on to लाभिनो भवेयुः. In C. and P. the Praṇidhâna stands here in its right place.

॥१९॥ सचेन्मे भगवन्बोधिप्राप्तस्याप्रमेयासंख्येयेषु बुद्धक्षेत्रेषु ये सत्त्वा मम नामधेयं श्रुत्वा तत्र बुद्धक्षेत्रे चित्तं[1] प्रेरयेयुरुपपत्तये कुशलमूलानि च परिणामयेयुस्ते तत्र बुद्धक्षेत्रे नोपपद्येरन्नंतशो दशभिश्चित्तोत्पादपरिवर्तैः स्थापयित्वानंतर्यकारिणः[2] सद्धर्मप्रतिक्षेपावरणकृतांश्च[3] सत्त्वान्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥[4]

॥२०॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजाता भवेयुस्ते सर्वे नैकजातिप्रतिबद्धाः स्युरनुत्तरायां सम्यक्संबोधौ स्थापयित्वा प्रणिधानविशेषांस्तेषामेव बोधिसत्त्वानां महासत्त्वानां महासंनाहं संनद्धानां सर्वलोकार्थसंबुद्धानां सर्वलोकाभियुक्तानां सर्वलोकपरिनिर्वाणाभियुक्तानां सर्वलोकधातुषु बोधिसत्त्वचर्यां चरितुकामानां सर्वबुद्धानां संवर्तुकामानां गंगानदीवालुकासमान्सत्त्वाननुत्तरायां सम्यक्संबोधौ प्रतिष्ठापकानां भूयश्चोत्तरिचर्याभिमुखानां समंतभद्रचर्यानिर्यातानां मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२१॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये बोधिसत्त्वाः प्रत्याजाता भवेयुस्ते सर्व एकपुरोभक्तेनान्यानि बुद्धक्षेत्राणि गत्वा बहूनि बुद्धशतानि बहूनि बुद्धसहस्राणि बहूनि बुद्धशतसहस्राणि बह्वीर्बुद्धकोटीर्यावद्बहूनि बुद्धकोटीनियुतशतसहस्राणि नोपति-

[1] From चित्तं to बुद्धक्षेत्रे left out in P. [2] See Childers s. v. pañcânantariyakammam. [3] कृतांश्च P C. कृतां च A. कृतास्च B. [4] A. and B. repeat § 19.
[5] सवर्त्तुं A. संवर्तुं B C. सत्तुं P.

तस्मिन्बुद्धक्षेत्रे सत्त्वानां प्रमाणीकृतमायुष्प्रमाणं भवेदन्यत्र प्रणिधानवशेन मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥१५॥ सचेन्मे भगवन्बोधिप्राप्तस्यायुष्प्रमाणं[1] पर्यन्तीकृतं भवेदन्तशः कल्पकोटीनियुतशतसहस्रगणनयापि मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥१६॥ सचेन्मे भगवन्बोधिप्राप्तस्य तस्मिन्बुद्धक्षेत्रे सत्त्वानामकुशलस्य नामधेयमपि भवेन्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥१७॥ सचेन्मे भगवन्बोधिप्राप्तस्य नाप्रमेयेषु बुद्धक्षेत्रेष्वप्रमेयासंख्येया बुद्धा भगवंतो नामधेयं परिकीर्तयेयुर्न वर्णं भाषेरन्न प्रशंसामभ्युदीरयेरन्न समुदीरयेयुर्मा[2] तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥१८॥ सचेन्मे भगवन्बोधिप्राप्तस्य ये सत्त्वा अन्येषु लोकधातुष्वनुत्तरायां सम्यक्संबोधौ चित्तमुत्पाद्य मम नामधेयं श्रुत्वा प्रसन्नचित्ता मामनुस्मरेयुस्तेषां चेदहं मरणकालसमये प्रत्युपस्थिते[3] भिक्षुसंघपरिवृतः पुरस्कृतो न पुरतस्तिष्ठेयं यदिदं चित्ताविक्षेपतायै मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

[1] A. and B. insert after आयुष्प्रमाणं in § 15, तत्र सत्त्वानां प्रमाणीकृतमायुष्प्रमाणं भवेदन्यत्र प्रणिधानवशेन मा तावद्° ध्येयं । सचेन्मे भगवन्बोधिप्राप्तस्यायुष्प्रमाणं. [2] न वर्णं भाषेरन् । न वर्णं भाषेरन् A. B. C. न वर्णं भाषयन् P. न प्रशंसामभ्युदीरये° युः । प्रशंसामभ्युदीरयेरन्न समुदीरयेयु A. B (exc. प्रशं) C. (exc. रयन्तु?) न प्रशंसामभ्युदीरयेरन् । समुदीरयेयुः P
[3] ते P C. तौ B. त A

॥ ४३ ॥ सचेन्मे भगवन्बोधिप्राप्तस्य समन्ताद्दशसु दिक्षु बुद्धक्षेत्रेषु ये सत्त्वा मम नामधेयं श्रुत्वा मम बुद्धक्षेत्रे चित्तं प्रेरयेयुरुपपत्तये कुशलमूलानि च परिणामयेयुस्ते मम बुद्धक्षेत्रे नोपपद्येरन्नन्तशो दशभिश्चित्तोत्पादपरिवर्तैः स्थापयित्वानन्तर्यकारिणः[1] सद्धर्मप्रतिक्षेपावरणावृतांश्च सत्त्वान्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ।[2]

॥ ४४ ॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजाता भवेयुस्ते सर्वे नैकजातिप्रतिबद्धाः स्युरनुत्तरायां सम्यक्संबोधौ स्थापयित्वा प्रणिधानविशेषांस्तानेव बोधिसत्त्वानां महासत्त्वानां महासंनाहसंनद्धानां सर्वलोकार्थसंनद्धानां सर्वलोकाभियुक्तानां सर्वलोकपरिनिर्वाणाभियुक्तानां सर्वलोकधातुषु बोधिसत्त्वचर्यां चरितुकामानां सर्वबुद्धानां सेवितुकामानां गङ्गानदीवालुकासमान्सत्त्वाननुत्तरायां सम्यक्संबोधौ प्रतिष्ठापकानां भूयश्चोत्तरिचर्याभिमुखानां समन्तभद्रचर्यानियतानां मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥ ४५ ॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये बोधिसत्त्वाः प्रत्याजाता भवेयुस्ते सर्वे एकपुरोभक्तेनान्यानि बुद्धक्षेत्राणि गत्वा बहूनि बुद्धशतानि बहूनि बुद्धसहस्राणि बहूनि बुद्धशतसहस्राणि बहूनि बुद्धकोटीर्बहूनि बुद्धकोटीनियुतशतसहस्राणि नोपति-

[1] From चित्तं to बुद्धक्षेत्रे left out in P. [2] See Childers s. v. pañkânantariyakammâni. [3] भूयश्च P. C. भूयश्च A. भूयश्च B. [4] A. and B. repeat § 19. [5] [illegible] A. [illegible] B. C. [illegible] P.

ठिरन्सर्वसुखोपधानैस्तदिदं बुद्धानुभावेन मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२२॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे बोधिसत्त्वा यथारूपैराकारैराकांक्षेयुः कुशलमूलान्यवरोपयितुं यदिदं सुवर्णेन वा रजतेन वा मणिमुक्ताविडूर्यशंखशिलाप्रवाडस्फटिकमुसारगल्वलोहितमुक्ताश्मगर्भादिभिर्वान्यतमान्यतमैः सर्वै रत्नैर्वा सर्वगंधपुष्पमाल्यविलेपनधूपचूर्णचीवरच्छत्त्रध्वजपताकाप्रदीपैर्वा सर्वनृत्यगीतवाद्यैर्वा तेषां च तथारूपा आहाराः सहचित्तोत्पादान्न प्रादुर्भवेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२३॥ [2]सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजाता भवेयुस्ते सर्वे न सर्वज्ञतासहगतां धर्मकथां कथयेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२४॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये बोधिसत्त्वा एवं चित्तमुत्पादयेयुर्यदिहैव वयं लोकधातौ स्थित्वाप्रमेयासंख्येयेषु बुद्धक्षेत्रेषु बुद्धान्भगवतः सत्कुर्याम गुरुकुर्याम मानयेम पूजयेम यदिदं चीवरपिंडपात्रशयनासनग्लानप्रत्ययभैषज्यपरिष्कारैः[4] पुष्पधूपदीपगंधमाल्यविलेपनचूर्णचीवरच्छत्त्रध्वजपताकाभिर्नानाविधनृत्यगीतवाद्यै रत्नवर्षैरिति तेषां च बुद्धा भगवंतः सहचि-

[1] ... र A. B leave out till नुत्तरां सम्यक्संबोधि etc. [2] The 23rd ...ut in C. [3] उत्पद्यु A. उत्पद्युः B. उत्पद्येषु P [4] परिस्कारैः B.

शोपादाच्च प्रतिगृह्णीयुर्यदिदमनुकंपामुपादाय मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२५॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये बोधिसत्त्वाः प्रत्याजाता भवेयुस्ते सर्वे न नारायणवज्रसंहतात्मभावस्थामप्रतिलब्धा भवेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२६॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे यः कश्चित्सत्त्वोऽलंकारस्य वर्णपर्यंतमुद्गृह्णीयादंतशो दिव्येनापि चक्षुषैवंवर्णमेवंविभूतीदं बुद्धक्षेत्रमिति[1] नानावर्णतां जानीयान्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२७॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे यः सर्वपरीत्तकुशलमूलो बोधिसत्त्वो सोऽंतशो योजनशतोत्थितमुदारवर्णं बोधिवृक्षं न संजानीयान्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२८॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे कस्यचित्सत्त्वस्योद्देशो वा स्वाध्यायो वा कर्तव्यः स्यान्न ते सर्वे प्रतिसंवित्प्राप्ता भवेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥२९॥ सचेन्मे भगवन्बोधिप्राप्तस्य नैवं प्रभास्वरं तद्बुद्धक्षेत्रं भवेद्यत्र समंतादप्रमेयासंख्येयाचिंत्यातुल्यापरिमाणानि बुद्धक्षे-

[1] एवं वर्णा ऋद्धिभूतिरिदं बुद्धक्षेत्रमिति A. एवं वर्णाः एवं विभूतिरिदं बुद्धक्षेत्रमिति B. एव वर्णा एवं विभूतिरिदं बुद्धक्षेत्रमिति C. P.

चाणि संदृश्येरन्[1] तद्यथापि नाम परिमृष्ट आदर्शमंडले मुखमंडलं मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३०॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे धरणीतलमुपादाय यावदंतरीक्षाद्देवमनुष्यविषयातिक्रांतस्याभिजातस्य धूपस्य तथागतबोधिसत्त्वपूजाप्रत्यर्हस्य सर्वरत्नमयानि नानासुरभिगंधघटिकाशतसहस्राणि सदा निधूपितान्येव न स्युर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३१॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे न सदाभिप्रवृष्टान्येव सुगंधिनानारत्नपुष्पवर्षाणि सदा प्रवादिताश्च मनोज्ञस्वरा वाद्यमेघा न स्युर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३२॥ सचेन्मे भगवन्बोधिप्राप्तस्य ये सत्त्वा अप्रमेयासंख्येयाचिंत्यातुल्येषु लोकधातुष्वाभया[2] स्फुटा भवेयुस्ते सर्वे न देवमनुष्यसमतिक्रांतेन सुखेन समन्वागता भवेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३३॥ सचेन्मे भगवन्बोधिप्राप्तस्य समंतादप्रमेयाचिंत्यातुल्यापरिमाणेषु बुद्धक्षेत्रेषु बोधिसत्त्वा महासत्त्वा मम नामधेयं श्रुत्वा तच्छ्रवणसहगतेन कुशलेन जातिव्यतिवृत्ता संतो न धारणीप्रतिलब्धा भवेयुर्यावद्बोधिमंडपर्यंतमिति मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

[1] संदृश्यते A. संदृश्यते B. संदृश्यन् C संदृश्यत् P. [2] P reads अप्रमेयासंख्येयाचिंत्यातुल्यप्रभया स्फुता भवेयुः.

॥३४॥ सचेन्मे भगवन्बोधिप्राप्तस्य समंतादप्रमेयासंख्येयाचिंत्यातुल्यापरिमाणेषु बुद्धक्षेत्रेषु याः स्त्रियो मम नामधेयं श्रुत्वा प्रसादं[1] संजनयेयुर्बोधिचित्तं नोत्पादयेयुः स्त्रीभावं च न विजुगुप्सेरन् जातिव्यतिवृत्ताः समानाः सचेद्द्वितीयं स्त्रीभावं प्रतिलभेरन्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३५॥ सचेन्मे भगवन्बोधिप्राप्तस्य समंताद्दशसु दिक्ष्वप्रमेयासंख्येयाचिंत्यातुल्यापरिमाणेषु बुद्धक्षेत्रेषु ये बोधिसत्त्वा मम नामधेयं श्रुत्वा प्रणिपत्य पंचमंडलनमस्कारेण वंदिष्यंते ते बोधिसत्त्वचर्यां चरंतो न सदेवकेन लोकेन सत्क्रियेरन्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३६॥ सचेन्मे भगवन्बोधिप्राप्तस्य कस्यचिद्बोधिसत्त्वस्य चीवरधावनशोषणसीवनरंजनकर्म कर्तव्यं भवेन्न नैव नवाभिज्ञातचीवररत्नैः प्रावृतमेवात्मानं संजानीयुः[4] सहचित्तोत्पादात्तथागतानुज्ञातैर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३७॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे सहोत्पन्नाः सत्त्वा नैवंविधं सुखं प्रतिलभेरंस्तद्यथापि नाम निष्परिदाहस्यार्हतो भिक्षोस्तृतीयध्यानसमापन्नस्य मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३८॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये बोधिसत्त्वाः प्रत्याजातास्ते यथारूपं बुद्धक्षेत्रे गुणालंकारव्यूहमाकांक्षिष्युस्तथा-

[1] प्रसादं A P. प्रमादं B. [2] धोवन A B C. धावन P. [3] न नैव न [illegible] A. न नैव [illegible] B. न नैव [illegible] C. न नव [illegible] P. [4] [illegible]

रूपं नानारत्नवृक्षेभ्यो न संजनयेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३९॥ सचेन्मे भगवन्बोधिप्राप्तस्य मम नामधेयं श्रुत्वान्यबुद्धक्षेत्रोपपन्ना बोधिसत्त्वा इंद्रियबलवैकल्यं गच्छेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४०॥ सचेन्मे भगवन्बोधिप्राप्तस्य तदन्यबुद्धक्षेत्रस्थाने बोधिसत्त्वा मम नामधेयसहश्रवणान्न सुविभक्तवतीं नाम समाधिं प्रतिलभेरन्यत्र समाधौ स्थित्वा बोधिसत्त्वा एकक्षणव्यतिहारेणाप्रमेयासंख्येयाचिंत्यातुल्यापरिमाणान्बुद्धान्भगवतः पश्यंति स चैषां समाधिरंतरा विप्रणश्येन्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४१॥ सचेन्मे भगवन्बोधिप्राप्तस्य तदन्येषु बुद्धक्षेत्रेषु[1] मम नामधेयं श्रुत्वा तच्छ्रवणसहगतेन[2] कुशलमूलेन सत्त्वा नाभिजातकुलोपपत्तिं प्रतिलभेरन्यावद्बोधिपर्यंतं मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४२॥ सचेन्मे भगवन्बोधिप्राप्तस्य तदन्येषु बुद्धक्षेत्रेषु ये बोधिसत्त्वा मम नामधेयं श्रुत्वा तच्छ्रवणकुशलमूलेन यावद्बोधिपर्यंतं ते सर्वे बोधिसत्त्वचर्याप्रीतिप्रामोद्यकुशलमूलसमवधानगता न भवेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

[1] [illegible] A B C P [2] [illegible] A B C P [3] तदन्येषु बुद्धक्षेत्रेषु left out in C P [4] [illegible] B. C. P [illegible] A [5] कुशलो B [6] [illegible] A [illegible] P [illegible] B [illegible] C

॥४३॥ सचेन्मे भगवन्बोधिप्राप्तस्य सहनामधेयश्रवणात्तदन्येषु लोकधातुषु बोधिसत्त्वा न समंतानुगतं नाम समाधिं प्रतिलभेरन्यत्र स्थित्वा बोधिसत्त्वा एकक्षणव्यतिहारेणाप्रमेयासंख्येयाचिंत्यातुल्यापरिमाणान्बुद्धान्भगवतः सत्कुर्वंति स चैषां समाधिरंतरा विप्रणश्येद्यावद्बोधिमंडपर्यंतं मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४४॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजाता भवेयुस्ते यथारूपां धर्मदेशनामाकांक्षेयुः श्रोतुं तथारूपां सहचित्तोत्पादान्न शृणुयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

[1]॥४५॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे[2] तदन्येषु बुद्धक्षेत्रेषु ये च[3] बोधिसत्त्वा मम नामधेयं शृणुयुस्ते सहनामधेयश्रवणान्नावैवर्तिका भवेयुरनुत्तरायाः सम्यक्संबोधेर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४६॥ सचेन्मे भगवन्बोधिप्राप्तस्य बुद्धनाम्नुर्बुद्धक्षेत्रेषु ते बोधिसत्त्वा मम नामधेयं शृणुयुस्ते सहनामधेयश्रवणात्प्रथमद्वितीयतृतीयाः क्षांतीः प्रतिलभेरन्नावैवर्तिका भवेयुर्बुद्धधर्मसंघेभ्यो मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥८॥

अथ खल्वानंद स धर्माकरो भिक्षुरिमानेवंरूपान्प्रणि-

[1] This Praṇidhāna (45) is left out in D. [2] क्षेत्रेषु A B, क्षेत्रे C [3] च B.
[4] बुद्धक्षेत्रेषु A B, बुद्धक्षेत्रेषु D, बुद्धक्षेत्रेषु C [5] ये A B C D, ये । [6] द्वतीय A, B C D., also र्था and र्था.

रूपं नानारत्नवृक्षेभ्यो न संजनयेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥३९॥ सचेन्मे भगवन्बोधिप्राप्तस्य मम नामधेयं श्रुत्वान्यबुद्धक्षेत्रोपपन्ना बोधिसत्त्वा इंद्रियबलवैकल्यं गच्छेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४०॥ सचेन्मे भगवन्बोधिप्राप्तस्य तदन्यबुद्धक्षेत्रस्थाने बोधिसत्त्वा मम नामधेयसहश्रवणान्न सुविभक्तवतीं नाम समाधिं प्रतिलभेरन्यत्र समाधौ स्थित्वा बोधिसत्त्वा एकक्षणव्यतिहारेणाप्रमेयासंख्येयाचिंत्यातुल्यापरिमाणान्बुद्धान्भगवतः पश्यंति स चैषां समाधिरंतरा विप्रणश्येन्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४१॥ सचेन्मे भगवन्बोधिप्राप्तस्य तदन्येषु बुद्धक्षेत्रेषु[3] मम नामधेयं श्रुत्वा तच्छ्रवणसहगतेन[4] कुशलमूलेन सत्त्वा नाभिजातकुलोपपत्तिं प्रतिलभेरन्यावद्बोधिपर्यंतं मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४२॥ सचेन्मे भगवन्बोधिप्राप्तस्य तदन्येषु बुद्धक्षेत्रेषु ये बोधिसत्त्वा मम नामधेयं श्रुत्वा तच्छ्रवणकुशलमूलेन यावद्बोधिपर्यंतं ते सर्वे बोधिसत्त्वचर्याप्रीतिप्रामोद्यकुशलमूलसमवधानगता न भवेयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

[1] मं मम A B C P. [2] सत्त्वधात्व° A. B. C. P. [3] तदन्येषु बुद्धक्षेत्रेषु left out in C P. [4] °च्छ्रवणसहगतेन B. C. P. °श्रवण A [5] कुशलो° B [6] तच्छ्रवणेन A. तच्छ्रवण P. तच्छ्रवणेन B तच्छ्रवण C.

॥४३॥ सचेन्मे भगवन्बोधिप्राप्तस्य सहनामधेयश्रवणात्तदन्येषु लोकधातुषु बोधिसत्त्वा न समंतानुगतं नाम समाधिं प्रतिलभेरन्यत्र स्थित्वा बोधिसत्त्वा एकक्षणव्यतिहारेणाप्रमेयासंख्येयाचिंत्यातुल्यापरिमाणान्बुद्धान्भगवतः सत्कुर्वंति स चैषां समाधिरंतरा विप्रणश्येद्यावद्बोधिमंडपर्यंतं मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४४॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजाता भवेयुस्ते यथारूपां धर्मदेशनामाकांक्षेयुः श्रोतुं तथारूपां सहचित्तोत्पादान्न शृणुयुर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

[1]॥४५॥ सचेन्मे भगवन्बोधिप्राप्तस्य तत्र बुद्धक्षेत्रे[2] तदन्येषु बुद्धक्षेत्रेषु ये च[3] बोधिसत्त्वा मम नामधेयं शृणुयुस्ते सहनामधेयश्रवणान्नावैवर्तिका भवेयुरनुत्तरायाः सम्यक्संबोधेर्मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥

॥४६॥ सचेन्मे भगवन्बोधिप्राप्तस्य बुद्धशास्तुर्बुद्धक्षेत्रेषु ते बोधिसत्त्वा मम नामधेयं शृणुयुस्ते सहनामधेयश्रवणात्प्रथमद्वितीयतृतीयाः क्षांतीः प्रतिलभेरन्नावैवर्तिका भवेयुर्बुद्धधर्मसंघेभ्यो मा तावदहमनुत्तरां सम्यक्संबोधिमभिसंबुध्येयं ॥८॥

अथ खल्वानंद स धर्माकरो भिक्षुरिमानेवंरूपान्प्रणि-

[1] This Praṇidhâna (45) is left out in P. [2] क्षेत्रेषु A B. क्षेत्रे C [3] च B
[4] बुद्धशतसहस्रेषु A B. बुद्धशतेषु P बुद्धशतेषु C [5] ते A B C P वे? [6] द्वात्रिं- A B C P., also वां and वं.

धानविशेषाधिदिश्य तस्यां वेलायां गुणानुभावेनेमा गाथा अभाषत ॥

सचि मि[1] -- विशिष्ट नेचरूपा ।
यत्प्रणिधान सिया गु बोधिमासो[2] ।
माह् सिय गवेंद्र[3] सत्त्वसारो ।
दशबलधारि[4] अतुल्यदक्षिणीयः ॥१॥
सचि मि सिय न शोच एचरूपं ।
वहु अथ नानंप्रभूतंदिव्यचित्तं[7] ।
सुखित नरक येय[8] दुःखप्राप्तो ।
माह् सिया रत्नान -- राजा[9] ॥२॥
सचि मि उपगतस्य बोधिमंड ।
दशदिशि प्रव्रजि नामधेयु क्षिप्रं[10] ।
पृथु वहव अनंतबुद्धक्षेत्रा ।
माह् सिया बलप्राप्तु लोकनाथः ॥३॥
सचि खु अहु रमेय कामभोगां ।
स्मृतिमतिया गतिया[11] विहीनु संतः ।

[1] सचि नि B. After this two syllables are wanting in all the MSS., but one MS. of the Bibliothèque Nationale at Paris reads क्षमि, which may be meant for श्याम or धाम, only that the first syllable ought to be short. [2] °प्राप्तो A B P., which may also be °प्राप्ते। written too closely. [3] माह्य सियजचेन्द्र A C. °चन्द्र B माक्ष सियतगवेन्द्र P. [4] दशबलध्वनि P. [5] बहुधनाना° C. [6] त is left out in A B. [7] °चित्तं B C. P. [8] रकये य? [9] मोहे सिय रत्वान राजा A. °रत्नोत्तमराजा P मोह सिय रत्नान पना B °रत्नोन राजा C. रत्नान, for रत्नानां. [10] न seems to be wanted. [11] गतिया left out in A. B; see Lal. Vist. p. 84, l. 15.

अतुलशिव समेयमान[1] बोधि ।
माह सिया चलप्राप्तु[2] शास्त लोके[3] ॥४॥
विपुलप्रभ अतुल्यनंत[4] नाथ ।
दिशि विदिशि[5] स्फुरि सर्वबुद्धक्षेत्रा[6] ।
राग प्रशमि सर्वदोषमोहां ।
नरकगतिसि[7] प्रशमि धूमकेतुं ॥५॥
जनिय सुरुचिरं विशालनेत्रं ।
विधुंनिय सर्वनराण अंधकारं ।
अपनिय सु न अक्षणानशेषां[12] ।
उपनमि स्वर्गगताननंततेजां[13] ॥६॥
न तपति नभ[14] चंद्रसूर्यआभा ।
मणिगण अग्निप्रभा न देवतानां ।
अभिभवति नरेंद्र आभ सर्वा ।
पुरिमचरि परिशुद्ध आचरित्वा ॥७॥
पुरुषवर निधान दुःखितानां ।
दिशि विदिशासु न[16] अस्ति एषरूपः[17] ।

[1] °मान A. B. C. P.; cf. Pâli sameto. [2] मास सिया चले माप्तु A B C P. [3] प्राप्तु लोके A. B. शास्त लोके P. लोके C., शास्त being left out. [4] °त्यानंत A B C. P. [5] विदिश C. P. विदि A B. [6] क्षेत्रां C. क्षेत्रा B. P. क्षत्रा A. [7] B inserts र. [8] धूम° C. P. धूम A B. [9] विशाल° C. [10] विधु° A. B. C. P. [11] सु is left out in A B. [12] अपनय सुरपद्मानाशेषां A. अपय° B. सुपनिय सुन अक्षमानशेषां P. अपरिय सुन अक्षणानशेषां C. It may be apaliya. [13] °गतानन्ततेजां A. B. °गताननन्ततेजां C. P. [14] नभय C. [15] चंद्र deest in C. [16] सुन B. [17] रूपरूपः A. रूपरूपः B. रूपरूपाः C. P.

[illegible] ।
[illegible] ॥ ९ ॥
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥ १० ॥
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥ ११ ॥
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ॥ १२ ॥
[illegible] ।
[illegible]
[illegible]
[illegible]

[illegible]

एवंरूपयानंद प्रणिधानसंपदा स धर्माकरो भिक्षुर्बोधिसत्त्वो महासत्त्वः समन्वागतोऽभूत्। एवंरूपया चानंद प्रणिधानसंपदाल्पका बोधिसत्त्वाः समन्वागताः। अल्पकानां चैवंरूपाणां प्रणिधीनां[1] लोके प्रादुर्भावो भवति। परीत्तानां न पुनः सर्वशो नास्ति॥ स खलु पुनरानंद धर्माकरो भिक्षुस्तस्य भगवतो लोकेश्वरराजस्य तथागतस्य पुरतः सदेवकस्य लोकस्य[2] समारकस्य सब्रह्मकस्य सश्रमणब्राह्मणिकायाः[3] प्रजायाः सदेवमानुषासुरायाः पुरत इमानेवंरूपान्प्रणिधानविशेषान्निर्दिश्य यथाभूतप्रतिज्ञाप्रतिपत्तिप्रतिष्ठितोऽभूत्। स इमामेवंरूपां बुद्धक्षेत्रपरिशुद्धिं बुद्धक्षेत्रमाहात्म्यं बुद्धक्षेत्रोदारतां समुदानयन्बोधिसत्त्वचर्यां चरन्नप्रमेयासंख्येयाचिंत्यातुल्यामाप्यापरिमाणानभिलाप्यानि वर्षकोटीनियुतशतसहस्राणि न जातु कामव्यापादविहिंसावितर्कान् वितर्कितवान्न जातु कामव्यापादविहिंसासंज्ञामुत्पादितवान्न जातु रूपशब्दगंधरसस्प्रष्टव्यसंज्ञामुत्पादितवान्। स दहरमनोहर एव सुरतो[5]ऽभूत्सुखसंवासोऽधिवासनजातीयः सुभगः सुपोषोऽल्पेच्छः संतुष्टः प्रविविक्तोऽदुष्टोऽमूढोऽवंको[6]ऽजिह्मोऽशठोऽमायावी सुखिलोमः प्रियालापो नित्याभियुक्तः[7] शुक्लधर्मपर्येष्टौ सुनिक्षिप्तधुरः सर्वसत्त्वानामर्थाय महाप्रणिधानं समुदानितवान्

[1] प्रणिधीना A. प्रणिधाना B. प्रणिधिना C. प्रणिधिना P. [2] लोकस्य left out in P. [3] ब्राह्मणिकायाः A. B. C. ब्राह्मणिकायाः P. [4] प्रतिज्ञाप्रतिपत्ति° A. B. प्रतिज्ञाप्रतिपत्ति° C. प्रतिज्ञाप्रतिपत्ति° P. [5] सुरतो B. C. P. सूरतो A. [6] अवको A. B. अवंको C. अवक्रः P. (अवक्रो? B. [7] नित्यायुक्तः A. B. C.

बुद्धधर्मसंघाचार्योपाध्यायकल्याणमित्रसगौरवो नित्यसंनद्धो बोधिसत्त्वचर्यायामार्जवो मार्दवोऽकुहकोऽनिलपको[1] गुणवान्पूर्वंगमः सर्वकुशलधर्मसमादापनतायै शून्यतानिमित्ताप्रणिहितानभिसंस्कारानुत्पादविहारैर्निर्माणः स्वारक्षितवाक्यश्चाभूत्। बोधिसत्त्वचर्यां चरन्स यद्वाक्कर्मात्सृष्टमात्मपरोभयव्यापादाय[3] संवर्तते तथाविधं त्यक्त्वा यद्वाक्कर्म स्वपरोभयहितसुखसंवर्तकं तदेवाभिप्रयुक्तवान् । एवं च संप्रजानोऽभूद्यद्ग्रामनगरनिगमजनपदराष्ट्रराजधानीष्ववतरन्न[5] जातु रूपशब्दगंधरसस्प्रष्टव्यधर्मेष्वनुनीतोऽभूत् ॥ अप्रतिहतः स बोधिसत्त्वचर्यायां चरन्स्वयं च दानपारमितायामचरत्परांश्च तत्रैव समादापितवान् स्वयं च[6]शीलक्षांतिवीर्यध्यानप्रज्ञापारमितास्वचरत्परांश्च तत्रैव समादापितवान् । तथारूपाणि च कुशलमूलानि समुदानीतवान् यैः[9] समन्वागतो यत्र यत्रोपपद्यते तत्र तत्रास्यानेकानि निधानकोटीनियुतशतसहस्राणि धरण्याः प्रादुर्भवंति ॥ तेन बोधिसत्त्वचर्यां चरता तावदप्रमेयासंख्येयानि सत्त्वकोटीनियुतशतसहस्राण्यनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापितानि येषां न सुकरं वाक्कर्मणा पर्यंतमधिगंतुं । तावदप्रमेयासंख्येया बुद्धा भगवंतः सत्कृता

[1] निलपको in all MSS [2] उत्सृष्ट सात्म° in all MSS. [3] व्यापाधाय A B C. व्यापाधाय P. [4] संप्रजानभूत P. संप्रजानतोऽभूत् A B C. It probably was originally एवं च संप्रजानोऽभूत्; see Pâli sampagâno. [5] न् in all MSS [6] C reads शीलपारमितायांक्षांतिपारमितावीर्यपारमिताध्यानपारमिताप्रज्ञा°. [7] चरत A. चरतः B. चरता C. चरन् P. [8] दा left out in C. [9] य: A. B. यै C

गुरुकृता मानिताः पूजिताश्चीवरपिंडपात्रशयनासनग्लानप्रत्ययभैषज्यपरिष्कारैः[1] सर्वसुखोपधानस्पर्शविहारैः प्रतिपादिताः[2]। यावंतः सत्त्वाः श्रेष्ठिगृहपत्यमात्यक्षत्रियब्राह्मणमहाशालकुलेषु प्रतिष्ठापितास्तेषां न सुकरो वाक्कर्मनिर्देशेन पर्यंतोऽधिगंतुं। एवं जांबूद्वीपेश्वराश्च प्रतिष्ठापिताश्चक्रवर्तित्वे लोकपालत्वे शक्रत्वे सुयामत्वे सुतुषितत्वे सुनिर्मितत्वे वशवर्तित्वे देवराजत्वे महाब्रह्मत्वे च प्रष्ठापिताः। तावदप्रमेयासंख्येया बुद्धा भगवंतः सत्कृता गुरुकृता मानिताः पूजिता धर्मचक्रप्रवर्तनार्थं चाधीष्टा येषां न सुकरो वाक्कर्मनिर्देशेन पर्यंतोऽधिगंतुं ॥ स एवंरूपं कुशलं समुदानयद्यदस्य बोधिसत्त्वचर्यां चरतोऽप्रमेयासंख्येयाचिंत्यातुल्यामाप्यापरिमाणानभिलाप्यानि कल्पकोटीनियुतशतसहस्राणि सुरभिर्दिव्यातिक्रांतचंदनगंधो मुखात्प्रवाति स्म। सर्वलोमकूपेभ्य उत्पलगंधो वाति स्म। सर्वलोकाभिरूपश्चाभूत्प्रासादिको दर्शनीयः परमशुभवर्णपुष्करतया समन्वागतः। लक्षणव्यंजनसमलंकृतेनात्मभावेन तस्य सर्वरत्नालंकाराः सर्ववस्त्रचीवराभिनिर्हाराः[5] सर्वपुष्पधूपगंधमाल्यविलेपनच्छत्रध्वजपताकाभिनिर्हाराः सर्ववाद्यसंगीत्यभिनिर्हाराश्च सर्वलोमकूपेभ्यः पाणितलाभ्यां च निश्चरंति स्म। सर्वान्नपानखाद्यभोज्यलेह्यरसाभिनिर्हाराः सर्वोपभोगपरिभोगाभिनिर्हाराश्च पाणितलाभ्यां प्रस्यंदंतः प्रादुर्भवंति

[1] परिस्कारैः A. B. परिष्कारैः C. P. [2] Some words seem left out here in all the MSS. [3] स्वा left out in B. [4] परमवृषभदे A. C. परमवृषभदे B. परमवृषदे P. [5] चीवराभिर्निर्हारा C. [6] रो A. B. C. P.

स। इति हि सर्वपरिष्कारवशिताप्राप्तः स आनंद धर्माकरो भिक्षुरभूत्पूर्वं बोधिसत्त्वचर्यां चरन् ॥१०॥

एवमुक्त आयुष्मानानंदो भगवंतमेतदवोचत्। किं पुनर्भगवन्स धर्माकरो भिक्षुर्बोधिसत्त्वो महासत्त्वोऽनुत्तरां सम्यक्संबोधिमभिसंबुध्यातीतः परिनिर्वृत उताहोऽनभिसंबुद्धो[2]ऽथ प्रत्युत्पन्नोऽभिसंबुद्ध एतर्हि तिष्ठति ध्रियते यापयति धर्मं च देशयति। भगवानाह। न खलु पुनरानंद स तथागतोऽतीतो नानागतः[3]। अपि त्वेव[4] स[5] तथागतोऽर्हन्सम्यक्संबोधिमभिसंबुद्ध एतर्हि तिष्ठति ध्रियते यापयति धर्मं च देशयति पश्चिमायां दिशीतो कोटीनियुतशतसहस्रतमे च बुद्धक्षेत्रे सुखावत्यां लोकधातावमिताभो नाम तथागतोऽर्हन्सम्यक्संबुद्धोऽपरिमाणैर्बोधिसत्त्वैः परिवृतः पुरस्कृतोऽनंतैः श्रावकैरनंतया बुद्धक्षेत्रसंपदा समन्वागतः॥११॥

अमिता चास्य प्रभा यस्य[6] न सुकरं प्रमाणंपर्यंतमधिगंतुमियंति बुद्धक्षेत्रशतानीयंति बुद्धक्षेत्रसहस्राणीयंति बुद्धक्षेत्रशतसहस्राणीयंति बुद्धक्षेत्रकोटीनीयंति[7] बुद्धक्षेत्रकोटीशतानीयंति बुद्धक्षेत्रकोटीसहस्राणीयंति[8] बुद्धक्षेत्रकोटीशतसहस्राणीयंति बुद्धक्षेत्रकोटीनियुतशतसहस्राणि स्फुरित्वा तिष्ठतीति। अपि तु[9] खलु पुनरानंद संक्षिप्तेन पूर्वस्यां दिशि गंगानदीवालुकोपमानि[10]

[illegible]

बुद्धक्षेत्रकोटीनियुतशतसहस्राणि तथा तस्य भगवतोऽमिताभस्य प्रभया सदा[1] स्फुटानि । एवं दक्षिणपश्चिमोत्तरास्वध ऊर्ध्वं[2] दिग्विदिक्षु चैकैकस्यां दिशि समंतात्गंगानदीवालुकोपमानि[3] [4]यावद्बुद्धक्षेत्रकोटीनियुतशतसहस्राणि तस्य भगवतोऽमिताभस्य प्रभया सदा परिस्फुटानि [5]स्थापयित्वा बुद्धान्भगवतः [6]पूर्वप्रणिधानाधिष्ठानेन ये व्यामप्रभयैकद्वित्रिचतुःपंचदशविंशतित्रिंशच्चत्वारिंशत्पंचाशद्योजनप्रभया योजनशतप्रभया योजनसहस्रप्रभया[8] योजनशतसहस्रप्रभया यावदनेकयोजनकोटीनियुतशतसहस्रप्रभया वा लोकं[9] स्फुरित्वा तिष्ठंति । नास्त्यानंदोपमोपन्यासो येन शक्यं तस्यामिताभस्य तथागतस्य प्रभायाः प्रमाणमुद्ग्रहीतुं । तदनेनानंद पर्यायेण स तथागतोऽमिताभ इत्युच्यतेऽमितप्रभोऽमितप्रभासोऽसमाप्तप्रभोऽसंगतप्रभः प्रभाशिखोत्सृष्टप्रभः सदिव्यमणिप्रभोऽप्रतिहतरश्मिरागप्रभो राजनीयप्रभः प्रेमणीयप्रभः प्रमोदनीयप्रभः संगमनीयप्रभ उपोषणीयप्रभो निबंधनीयप्रभोऽतिवीर्यप्रभोऽतुल्यप्रभोऽभिभूयनरेंद्रामूत्रयेंद्रप्रभः[11] श्रांतसंचयेंदुसूर्यजिह्मीकरणप्रभोऽभिभूयलोकपालशक्रब्रह्मशुद्धावासमहे-

[1] सदा left out in A. B. [2] पश्चिमोत्तरोधोध ऊर्ध्वमनुविदिक्षु A. पश्चिमोत्तरोध ऊर्ध्वं दिग्विदिक्षु B. पश्चिमोत्तरासु दिक्षु अध ऊर्ध्वमनुविदिक्षु C. पश्चिमोत्तरासु दिक्षु अधऊर्ध्वमनुविदिक्षु P. [3] वालिकासमानि A. B. C. P. [4] यावद्बुद्ध° A. बद्बुद्ध P. [5] स्थापयित्वा बुद्धां A. B. C. स्थापयित्वा बुद्धा P. [6] बुद्धा added in C. P. before पूर्वे. [7] वृ A. B. C. P. [8] This passage is repeated in C. [9] वा left out in A. [10] यावच्छो A. यावच्छो B. वा छो C. वा छो P. [11] मूत्र B. C. P. मूत्र A. Is it meant for नरेंद्राभूत्रयेंद्र? For the series of indras, see Lal. Vist. p. 564. [12] च P. [13] श्रान्तसंचयेन्दुसूर्यजिह्मीकरणप्रभो A. श्रान्तसंचयेन्दुसूर्यजिह्मी° B. श्रान्तसंचयेन्दुसूर्यजिह्मी° C. श्रान्तसंचयेन्दुसूर्यजिह्मी° P.

श्चरसर्वदेवजिह्मीकरणप्रभ इत्युच्यते ॥ सा चायंप्रभा विमला विपुला कायसुखसंजननी चित्तौद्बिल्यंकरणी देवासुरनागयक्षगंधर्वगरुडमहोरगकिंनरमनुष्यामनुष्याणां[4] प्रीतिप्रामोद्यसुखकरणी कुशलाशयानां सत्त्वानां[6] कल्यकुशलमिमिणेवर्द्धिप्रामोद्यकरणी येऽन्येष्वप्यनंतापर्यंतेषु बुद्धक्षेत्रेषु। अनेन चानंद पर्यायेण तथागतः परिपूर्णं कल्पं भाषेतस्यामिताभस्य तथागतस्य नाम कर्मामादाय प्रभामारभ्य न च शक्नोति गुणपर्यंतमधिगंतुं तस्याः प्रभायाः तथागतस्य वैशारद्यानुपच्छेदो[8] भवेत्। तत्कस्य हेतोः। उभयमप्येतदानंदाप्रमेयमसंख्येयमचिंत्यापर्यंतं[9] यदिदं तस्य भगवतोऽमिताभस्य तथागतस्य प्रभागुणविभूतिः तथागतस्य चानुत्तरं प्रज्ञाप्रतिभानं ॥१२॥

तस्य खलु पुनरानंदामिताभस्य तथागतस्याप्रमेयः[10] श्रावकसंघो[11] यस्य न सुकरं प्रमाणमुद्ग्रहीतुमियत्यः[12] श्रावककोट्य इयंति श्रावककोटीशतानीयंति श्रावककोटीसहस्राणीयंति श्रावककोटीशतसहस्राणीयंति कंकराणीयंति विंवराणीयंति नयु-

[1] देव left out in B. [2] लो P. [3] न left out in A. [4] मनुष्यमनुष्यानां A. [5] स P. [6] सत्त्वानां C.; left out in A. B. सत्वां P. [7] सल्पकुशलमिमिणेवर्द्धि A. कल्पकुशलमिमिनेवर्द्धि P. कल्पकुशलमिमिणेवर्द्धि B. सल्पकुशलमिमिनेवर्द्धि C. Not clear; could it be mmaval? [8] वैशारद्योनोपच्छेदो A. B. C. वैशारद्योपच्छेदो P. [9] °चिंत्यापर्यंतं A. B. C. P. चिंत्यमपर्यंतं? [10] °मेया A. C. P. °मेयाः B [11] संघा B [12] इयत्या: A. इयत्यः C. P. इयत्यः श्रावककोट्यः left out in B [13] इयंति श्रावककोटीसहस्राणि left out in P. [14] विम्वराणि A. B. विंवराणि C. विम्बराणि P. See Lal. Vist. p. 169.

तानीयंत्यप्रमेयानीयंत्यक्षोभ्याणीयंतो विवाहा इयंति स्रोतांसीयं-
त्योजांसीयंत्यप्रमेयाणीयंत्यसंख्येयानीयंत्यगण्यानीयंत्यतुल्यानी-
यंत्यचिंत्यानीति। तद्यथानंद[3]भिक्षुर्मौद्गल्यायन ऋद्धिवशितामाप्तः
स आकांक्षन्त्रिसाहस्रमहासाहस्रलोकधातौ यावंति तारारूपाणि
तानि सर्वाण्येकरात्रिंदिवेन नागरेण गणयेत्[4] एवंरूपाणां चर्द्धिमतां
कोटीनियुतशतसहस्रं भवेत् ते च[5] वर्षकोटीनियुतशतसहस्रमनन्य-
कर्मणामिताभस्य[6] तथागतस्य प्रथमश्रावकसंनिपातं गणयेयुः
एभिर्गणयद्भिः शततमोऽपि भागो न गणितो भवेत्सहस्रतमोऽपि
शतसहस्रतमोऽपि यावत्कलामप्युपमामप्युपनिशामपि[7] न गणि-
तो भवेत् ॥ तद्यथानंद महासमुद्राच्चतुराशीतियोजनसहस्राण्या-
वेधेन तिर्यगप्रमेयात्कश्चिदेव पुरुषः शतधा भिन्नया वालाग्र-
कोट्यैकमुदकबिंदुमभ्युत्क्षिपेत् तत्किं मन्यस आनंद कतमोऽत्र
बहुतरः यो वा शतधा भिन्नया वालाग्रकोट्याभ्युत्क्षिप्त[9] एक
उदकबिंदुर्यो वा [10]महासमुद्रेऽप्स्कंधोऽवशिष्ट इति। आनंद आह।
योजनसहस्रमपि तावद्भगवन्महासमुद्रस्य परीत्तं भवेत्किमंग पुनः
शतधा भिन्नया वालाग्रकोट्योत्क्षिप्त एक उदकबिंदुः। भगवानाह।

[1] इयंत.....ताया A. B. P.; left out in C. [2] इयंत्यप्रमेयाणि left out in B. [3] मौद्गल्यायनो भिक्षुः P. [4] नागरेण गणयेद् A. नगरेण गणेद् B. नगरे न गणयेद् C. नगरे न गणयेद् P. [5] केन A. B. C. P. [6] कर्मणामिताभस्य A. B. C. कर्मणामिताभस्य P. [7] उप-निशामपि A. B. C. P. Cf. the Vajracchedikâ, p. 35, l. 10; p. 42, l. 7 (upanishadam). [8] वधेन तिर्यगप्रमेयात् A. B. C. वेधेन तिर्यग् प्रमेयात् P. [9] उत्क्षिप्त A. B. C. उत्क्षि-प्त P. [10] महासमुद्र अप्स्कंधोऽवशिष्ट A. महासमुद्र अप्स्कंधोऽवशिष्ट B. महासमुद्र अप्स्कंधोऽवशिष्ट C. महासमुद्र अप्स्कंधो वशिष्ट P.

तद्यथा स एकबिंदुरियंततः[1] स प्रथमसन्निपातोऽभूत्। तैर्मौद्गल्यायनसदृशैर्भिक्षुभिर्गणयद्भिस्तेन वर्षकोटीनियुतशतसहस्रेण गणितं भवेत् यथा महासमुद्रेऽप्स्कंधोऽवशिष्ट एवमगणितं द्रष्टव्यं। कः पुनर्वादो द्वितीयतृतीयादीनां श्रावकसंनिपातानां। एवमनंतापर्यंतस्तस्य भगवतः श्रावकसंघो योऽप्रमेयासंख्येय इत्येव संख्यां गच्छति ॥१३॥

अपरिमितं चानंद तस्य भगवतोऽमिताभस्य तथागतस्यायुःप्रमाणं यस्य न[2] सुकरं प्रमाणमधिगंतुमियंति वा कल्पशतानीयंति वा कल्पसहस्राणीयंति वा कल्पशतसहस्राणीयत्यो वा कल्पकोट्य इयंति वा कल्पकोटीशतानीयंति वा कल्पकोटीसहस्राणीयंति वा कल्पकोटीशतसहस्राणीयंति वा कल्पकोटीनियुतशतसहस्राणीति। अथ तर्ह्यानंदापरिमितमेव तस्य भगवत आयुःप्रमाणपर्यंतं। तेन स तथागतोऽमितायुरित्युच्यते। यथा चानंदेह लोकधातौ कल्पगणनाप्रज्ञप्तिसंकेतस्तथा[3] सांप्रत दश कल्पास्तस्य भगवतोऽमितायुषस्तथागतस्योत्पन्नस्यानुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य ॥१४॥

तस्य खलु पुनरानंद भगवतोऽमिताभस्य [illegible] नाम लोकधातुरृद्धा च स्फीता च क्षेमा च सुभिक्षा [illegible] च

[illegible]

बहुदेवमनुष्याकीर्णा च। तत्र खल्वानंद लोकधातौ न निरयाः संति न तिर्यग्योनिर्न प्रेतविषयो नासुराः काया नाक्षणोपपत्तयः। न च तानि रत्नानि लोके प्रचरंति यानि सुखावत्यां लोकधातौ विद्यंते ॥१५॥

सा खल्वानंद सुखावती लोकधातुः सुरभिनानागंधसमीरिता नानापुष्पफलसमृद्धा रत्नवृक्षसमलंकृता तथागताभिनिर्मितमनोज्ञस्वरनानाद्विजसंघनिषेविता। ते चानंद रत्नवृक्षा नानावर्णा अनेकवर्णा अनेकशतसहस्रवर्णाः। संति तत्र रत्नवृक्षाः सुवर्णवर्णाः सुवर्णमयाः। संति रूप्यवर्णा रूप्यमयाः[1]। संति वैडूर्यवर्णा वैडूर्यमयाः। संति स्फटिकवर्णाः स्फटिकमयाः। संति मुसारगल्वर्णा मुसारगल्वमयाः। संति लोहितमुक्तावर्णा लोहितमुक्तामयाः। संत्यश्मगर्भवर्णा अश्मगर्भमयाः॥ संति केचिद्द्वयो रत्नयोः सुवर्णस्य रूप्यस्य च। [2]संति त्रयाणां रत्नानां सुवर्णस्य रूप्यस्य वैडूर्यस्य च। संति चतुर्णां रत्नानां सुवर्णस्य रूप्यस्य वैडूर्यस्य स्फटिकस्य च। संति पंचानां रत्नानां[3] सुवर्णस्य रूप्यस्य वैडूर्यस्य स्फटिकस्य मुसारगल्वस्य च। संति षणां रत्नानां सुवर्णस्य रूप्यस्य वैडूर्यस्य स्फटिकस्य मुसारगल्वस्य लोहितमुक्तायाश्च। संति सप्तानां रत्नानां सुवर्णस्य रूप्यस्य वैडूर्यस्य स्फटिकस्य मुसारगल्वस्य लोहितमुक्ताया अश्मगर्भस्य च

[1] The MSS. constantly vary between सुवर्ण and सौवर्ण, रूप्य and रौप्य, but on the whole सुवर्ण and रूप्य preponderate.
[2] From संति त्रयाणां to रूप्यस्य left out in A. B. C.
[3] रत्नानां left out in A. B. C.

सप्तमस्य[1] ॥ तत्रानंद सुवर्णमयानां वृक्षाणां[2] सुवर्णमयानि मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि रूप्यमयाणि। रूप्यमयाणां वृक्षाणां रूप्यमयाण्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि वैडूर्यमयाणि । वैडूर्यमयाणां वृक्षाणां वैडूर्यमयाणि मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि स्फटिकमयानि । स्फटिकमयानां वृक्षाणां स्फटिकमयान्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि च मुसारगल्वमयानि। मुसारगल्वमयानां वृक्षाणां मुसारगल्वमयान्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि च लोहितमुक्तामयानि। लोहितमुक्तामयानां[3] वृक्षाणां लोहितमुक्तामयान्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि [4]चाश्मगर्भमयाणि। अश्मगर्भमयाणां वृक्षाणामश्मगर्भमयाण्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि च सुवर्णमयानि ॥ केषांचिदानंद वृक्षाणां[5] सुवर्णमयानि मूलानि रूप्यमयाः स्कंधा वैडूर्यमया विटपाः स्फटिकमयाः शाखा मुसारगल्वमयानि पत्त्राणि लोहितमुक्तामयानि पुष्पाण्यश्मगर्भमयाणि फलानि। केषांचिदानंद वृक्षाणां रूप्यमयाणि मूलानि वैडूर्यमयाः स्कंधाः स्फटिकमया विटपा मुसारगल्वमयाः शाखा लोहितमुक्तामयानि पत्त्राण्यश्मगर्भमयाणि पुष्पाणि सुवर्णमयानि फलानि। केषां-

[1] Instead of [illegible] C has [illegible] [2] Deest in A. C. P. For the sake of uniformity [illegible] have been [illegible] throughout, but they have been printed [illegible] in one of our MSS. [illegible] [3] Deest in A. B. C. [4] Some [illegible] P [5] P has [illegible] between [illegible] and [illegible]

दानंद वृक्षाणां वैडूर्यमयाणि मूलानि स्फटिकमयाः स्कंधा
सारगल्वमया विटपा लोहितमुक्तामयाः शाखा अश्मगर्भम-
णि पत्त्राणि सुवर्णमयानि पुष्पाणि रूप्यमयाणि फलानि।
पांचिदानंद वृक्षाणां स्फटिकमयानि मूलानि मुसारगल्वमयाः
धा लोहितमुक्तामया विटपा अश्मगर्भमयाः शाखाः सुवर्ण-
यानि पत्त्राणि रूप्यमयाणि पुष्पाणि वैडूर्यमयाणि फलानि।
पांचिदानंद वृक्षाणां मुसारगल्वमयानि मूलानि[1] लोहित-
क्तामयाः स्कंधा अश्मगर्भमया विटपाः सुवर्णमयाः शाखा
यमयाणि पत्त्राणि वैडूर्यमयाणि पुष्पाणि स्फटिकमयानि
लानि। केषांचिदानंद वृक्षाणां लोहितमुक्तामयानि मूला-
श्मगर्भमयाः [2]स्कंधाः सुवर्णमया विटपा रूप्यमयाः शाखा
डूर्यमयाणि पत्त्राणि स्फटिकमयानि पुष्पाणि मुसारगल्वम-
नि फलानि। केषांचिदानंद वृक्षाणामश्मगर्भमयाणि मूलानि
वर्णमयाः स्कंधा रूप्यमया विटपा वैडूर्यमयाः शाखाः स्फटिकम-
नि पत्त्राणि मुसारगल्वमयानि पुष्पाणि लोहितमुक्तामयानि
लानि ॥ केषांचिदानंद वृक्षाणां सप्तरत्नमयानि मूलानि[3]
प्तरत्नमयाः स्कंधाः सप्तरत्नमया विटपाः सप्तरत्नमयाः शाखाः
प्तरत्नमयानि पत्त्राणि सप्तरत्नमयानि पुष्पाणि सप्तरत्नमयानि
लानि ॥ सर्वेषां चानंद तेषां वृक्षाणां मूलस्कंधविटपशाखा-
त्रपुष्पफलानि सुखसंस्पर्शानि सुगंधीनि। वातेन प्रेरितेन[4] च

[1] मूलानि deest in A. B.
[2] From स्कंधा to अश्मगर्भमया deest in B.
[3] सप्तरत्न-
र्णानि मूलानि deest in P.
[4] वातेन रितेन A. C. P. वातेन प्रेरितेन B. प्रेरितानां?

सप्तमस्य[1] ॥ तत्रानंद सुवर्णमयानां वृक्षाणां[2] सुवर्णमयानि मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि रूप्यमयाणि। रूप्यमयाणां वृक्षाणां रूप्यमयाण्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि वैडूर्यमयाणि । वैडूर्यमयाणां वृक्षाणां वैडूर्यमयाणि मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि स्फटिकमयानि । स्फटिकमयानां वृक्षाणां स्फटिकमयान्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि च मुसारगल्वमयानि। मुसारगल्वमयानां वृक्षाणां मुसारगल्वमयान्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि च लोहितमुक्तामयानि। लोहितमुक्तामयानां[3] वृक्षाणां लोहितमुक्तामयान्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि [4]अश्मगर्भमयाणि। अश्मगर्भमयाणां वृक्षाणामश्मगर्भमयाण्येव मूलस्कंधविटपशाखापत्त्रपुष्पाणि फलानि च सुवर्णमयानि ॥ केषांचिदानंद वृक्षाणां[5] सुवर्णमयानि मूलानि रूप्यमयाः स्कंधा वैडूर्यमया विटपाः स्फटिकमयाः शाखा मुसारगल्वमयानि पत्त्राणि लोहितमुक्तामयानि पुष्पाण्यश्मगर्भमयाणि फलानि। केषांचिदानंद वृक्षाणां रूप्यमयाणि मूलानि वैडूर्यमयाः स्कंधाः स्फटिकमया विटपा मुसारगल्वमयाः शाखा लोहितमुक्तामयानि पत्त्राण्यश्मगर्भमयाणि पुष्पाणि सुवर्णमयानि फलानि। केषां-

[illegible] [2] [illegible] For the sake of uniformity [illegible] but they have been printed [illegible] [3] [illegible] [4] From [illegible] [5] [illegible] वृक्षाणां [illegible]

चिदानंद वृक्षाणां वैडूर्यमयाणि मूलानि स्फटिकमयाः स्कंधा मुसारगल्वमया विटपा लोहितमुक्तामयाः शाखा अश्मगर्भमयाणि पत्त्राणि सुवर्णमयानि पुष्पाणि रूप्यमयाणि फलानि। केषांचिदानंद वृक्षाणां स्फटिकमयानि मूलानि मुसारगल्वमयाः स्कंधा लोहितमुक्तामया विटपा अश्मगर्भमयाः शाखाः सुवर्णमयानि पत्त्राणि रूप्यमयाणि पुष्पाणि वैडूर्यमयाणि फलानि। केषांचिदानंद वृक्षाणां मुसारगल्वमयानि मूलानि[1] लोहितमुक्तामयाः स्कंधा अश्मगर्भमया विटपाः सुवर्णमयाः शाखा रूप्यमयाणि पत्त्राणि वैडूर्यमयाणि पुष्पाणि स्फटिकमयानि फलानि। केषांचिदानंद वृक्षाणां लोहितमुक्तामयानि मूलान्यश्मगर्भमयाः [2]स्कंधाः सुवर्णमया विटपा रूप्यमयाः शाखा वैडूर्यमयाणि पत्त्राणि स्फटिकमयानि पुष्पाणि मुसारगल्वमयानि फलानि। केषांचिदानंद वृक्षाणामश्मगर्भमयाणि मूलानि सुवर्णमयाः स्कंधा रूप्यमया विटपा वैडूर्यमयाः शाखाः स्फटिकमयानि पत्त्राणि मुसारगल्वमयानि पुष्पाणि लोहितमुक्तामयानि फलानि ॥ केषांचिदानंद वृक्षाणां सप्तरत्नमयानि मूलानि[3] सप्तरत्नमयाः स्कंधाः सप्तरत्नमया विटपाः सप्तरत्नमयाः शाखाः सप्तरत्नमयानि पत्त्राणि सप्तरत्नमयानि पुष्पाणि सप्तरत्नमयानि फलानि ॥ सर्वेषां चानंद तेषां वृक्षाणां मूलस्कंधविटपशाखापत्त्रपुष्पफलानि मृदुसंस्पर्शानि सुगंधीनि। वातेन प्रेरितेन[4] च

[1] मूलानि deest in A. B.   [2] From स्कंधाः to सप्तरत्नमया deest in B.   [3] अश्मगर्भमयानि मूलानि deest in P.   [4] वातेन रितेन A. C. P. वातेन प्रेरितेन B. प्रेरिताः?

तेषां वल्गुमनोज्ञघोषो निश्चरत्यसेचनकोऽप्रतिकूलः श्रवणाय। एवंरूपैरानंद [1]सप्तरत्नमयैर्वृक्षैः संततं तद्बुद्धक्षेत्रं समंताच्च कदलीस्कंधैः सप्तरत्नमयै रत्नतालपंक्तिभिश्चानुपरिक्षिप्तं सर्वतश्च हेमजालप्रतिच्छन्नं समंततश्च सर्वरत्नमयैः पद्मैः संछन्नं ॥ संति तत्र पद्मान्यर्धयोजनप्रमाणानि। संति योजनप्रमाणानि संति[2] द्वित्रिचतुःपंचयोजनप्रमाणानि संति यावद्दशयोजनप्रमाणानि। सर्वतश्च रत्नपद्मात्षट्त्रिंशद्रश्मिकोटीशतसहस्राणि निश्चरंति। सर्वतश्च रश्मिमुखात्षट्त्रिंशद्बुद्धकोटीशतसहस्राणि निश्चरंति सुवर्णमवर्णैः कायैर्द्वात्रिंशन्महापुरुषलक्षणधरैर्यानि पूर्वस्यां दिश्यप्रमेयासंख्येयासु लोकधातुषु गत्वा सत्त्वेभ्यो धर्मं देशयंति। [5]एवं दक्षिणपश्चिमोत्तरासु दिक्ष्वध ऊर्ध्वमनुविदिक्षु गतावरणे लोकेऽप्रमेयासंख्येयाँल्लोकधातून्गतिंगत्वा[6] सत्त्वेभ्यो धर्मं देशयंति॥१६॥

तस्मिन्खलु पुनरानंद बुद्धक्षेत्रे सर्वशः कालपर्वता न संति सर्वतो रत्नपर्वताः सर्वशः सुमेरवः पर्वतराजाः[7] सर्वशश्चक्रवाडा महाचक्रवाडाः[8] पर्वतराजाः[9]। समंताच्च तद्बुद्धक्षेत्रं समं रमणीयं पाणितलजातं नानाविधरत्नमणिचितभूमिभागं ॥ एवमुक्त

[1] From सप्तरत्न° to पद्मान्यर्धयोजन deest in B. [2] योजनप्रमाणानि संति deest in A. B. P. [3] शत deest in C. P. [4] शत deest in A. B. C. P. The Chinese translation presupposes शत, giving the numbers as 36—100—1000—1,000,000. [5] Cf. Vajracchedikâ, p. 21, l. 14. [6] Cf. the smaller Sukhâvatîvyûha, 9th paragraph, [illegible]। [7] पर्वतराजानः P. [8] महाचक्रवाडाः deest in A. B. [9] पर्वतराजानः A. C. P. [10] मणिचित्रभूमि A. °चित्रभूमि B. मणिचित्रभूमि C. [illegible] P.

आयुष्मानानंदो भगवंतमेतदवोचत्। ये च पुनस्ते भगवंश्चातुर्महाराजकायिका देवाः सुमेरुपार्श्वनिवासिनस्त्रायस्त्रिंशा[1] वा[2] सुमेरुमूर्ध्नि निवासिनस्ते कुत्र प्रतिष्ठिताः। भगवानाह। तत्किं मन्यस आनंद ये त इह सुमेरोः पर्वतराजस्योपरि यामा देवास्तुषिता वा[3] निर्माणरतयो वा[4] परनिर्मितवशवर्तिनो वा[5] ब्रह्मकायिका वा[6] ब्रह्मपुरोहिता वा महाब्रह्माणो वा यावदकनिष्ठा वा कुत्र ते प्रतिष्ठिता इति। आनंद[7] आह। अचिंत्यो भगवन्कर्मणां[8] विपाकः कर्माभिसंस्कारः। भगवानाह। लब्धस्त्वयानंदेहाचिंत्यः कर्मणां[9] विपाकः कर्माभिसंस्कारो न बुद्धानां भगवतामचिंत्यं बुद्धाधिष्ठानं कृतपुण्यानां च सत्त्वानामवरोपितकुशलमूलानां तथाचिंत्या पुण्या विभूतिः। आनंद[10] आह। न मेऽत्र भगवन्काचित्कांक्षा वा विमतिर्वा विचिकित्सा वा। अपि तु खल्वहमनागतानां सत्त्वानां कांक्षाविमतिविचिकित्सानिर्घाताय तथागतमेतमर्थं परिपृच्छामि। भगवानाह। साधु साध्वानंदैवं ते करणीयं ॥१९॥

तस्यां खल्वानंद सुखावत्यां लोकधातौ नानाप्रकारा नद्यः प्रवहंति। संति तत्र महानद्यो योजनविस्ताराः। संति यावद्विंशतित्रिंशच्चत्वारिंशत्पंचाशद्योजनविस्तारा यावद्द्वादशयोजनावेधाः[11] सर्वाश्च ता नद्यः सुखवाहिन्यो नानासुरभिगंधवारिवाहिन्यो

[1] त्रायत्रिंशा A. B. C. त्रायस्त्रिंशा P. [2] देवाः B. [3] देवा A. B. C. [4] देवा B. C. [5] देवा B. [6] देवाः A. B. C. [7] आनंद deest in P. [8] कर्मणा A. B. कर्मणा C. [9] कर्मणा B. P. [10] आनंद deest in P. [11] योजना A. C. ॥ योजनाः B. योजना P. योजनाः ?

तेषां वल्गुमनोज्ञघोषो निश्चरत्यसेचनकोऽप्रतिकूलः श्रवणाय। एवंरूपैरानंद [1]सप्तरत्नमयैर्वृक्षैः संततं तद्बुद्धक्षेत्रं समंताच्च कदलीस्कंधैः सप्तरत्नमये रत्नतालपंक्तिभिश्चानुपरिक्षिप्तं सर्वतश्च हेमजालप्रतिच्छन्नं समंततश्च सर्वरत्नमयैः पद्मैः संच्छन्नं ॥ संति तत्र पद्मान्यर्धयोजनप्रमाणानि। संति योजनप्रमाणानि संति[2] द्वित्रिचतुःपंचयोजनप्रमाणानि संति यावद्दशयोजनप्रमाणानि। सर्वतश्च रत्नपद्मात्षट्त्रिंशद्रश्मिकोटीशतसहस्राणि निश्चरंति। सर्वतश्च रश्मिमुखात्षट्त्रिंशद्बुद्धकोटीशतसहस्राणि निश्चरंति सुवर्णमयवर्णैः कायैर्द्वात्रिंशन्महापुरुषलक्षणधरैर्यानि पूर्वस्यां दिश्यप्रमेयासंख्येयासु लोकधातुषु गत्वा सत्त्वेभ्यो धर्मं देशयंति। [6]एवं दक्षिणपश्चिमोत्तरासु दिक्ष्वध ऊर्ध्वमनुविदिक्षु गतावरणे लोकेऽप्रमेयासंख्येयाँल्लोकधातून्गतिंगत्वा" सत्त्वेभ्यो धर्मं देशयंति॥१६॥

तस्मिन्खलु पुनरानंद बुद्धक्षेत्रे सर्वशः कालपर्वता न संति सर्वतो रत्नपर्वताः सर्वशः सुमेरवः पर्वतराजाः[7] सर्वशश्चक्रवाडा महाचक्रवाडाः[8] पर्वतराजाः[9]। समंताच्च तद्बुद्धक्षेत्रं समं रमणीयं पाणितलजातं नानाविधरत्नमणिचितभूमिभागं ॥ एवमुक्त

[1] From सप्तरत्न° to यथार्धयोजन deest in B. [2] योजनप्रमाणानि संति deest in A. B. P. [3] शत deest in C. P. [4] शत deest in A. B. C. P. The Chinese translation presupposes शत, giving the numbers as 36—100—1000—1,000,000. [5] Cf. Vagrakkhedikâ, p. 21, l. 14. [6] Cf. the smaller Sukhâvatîvyûha, 9th paragraph: [illegible] [7] पर्वतराजानः P. [8] महाचक्रवाडाः deest in A. B. [9] पर्वतराजानः A. C. P. [10] मणिचित्रभूमि A °चित्रभूमि B [illegible] C [illegible] P

आयुष्मानानंदो भगवंतमेतदवोचत्। ये च पुनस्ते भगवंश्चातुर्म-
हाराजकायिका देवाः सुमेरुपार्श्वनिवासिनस्त्रायस्त्रिंशा[1] वा[2]
सुमेरुमूर्ध्नि निवासिनस्ते कुत्र प्रतिष्ठिताः। भगवानाह। तत्किं
मन्यस आनंद ये त इह सुमेरोः पर्वतराजस्योपरि यामा देवा-
स्तुषिता वा[3] निर्माणरतयो वा[4] परनिर्मितवशवर्तिनो वा[5]
ब्रह्मकायिका वा[6] ब्रह्मपुरोहिता वा[7] महाब्रह्माणो वा[8] यावदक-
निष्ठा वा[9] कुत्र ते प्रतिष्ठिता इति। आनंद[10] आह। अचिंत्यो
भगवन्कर्मणां[11] विपाकः कर्माभिसंस्कारः। भगवानाह। लब्धस्त्व-
यानंदेहाचिंत्यः कर्मणां[12] विपाकः कर्माभिसंस्कारो न बुद्धानां
भगवतामचिंत्यं बुद्धाधिष्ठानं कृतपुण्यानां च सत्त्वानामवरोपित-
कुशलमूलानां तथाचिंत्या पुण्या विभूतिः। आनंद[13] आह। न
मेऽत्र भगवन्काचित्कांक्षा वा विमतिर्वा विचिकित्सा वा। अपि
तु खल्वहमनागतानां सत्त्वानां कांक्षाविमतिविचिकित्सानिर्घा-
ताय तथागतमेतमर्थं परिपृच्छामि। भगवानाह। साधु साध्वानंदैवं
ते करणीयं ॥१७॥

तस्यां खल्वानंद सुखावत्यां लोकधातौ नानाप्रकारा नद्यः
प्रवहंति। संति तत्र महानद्यो योजनविस्ताराः। संति यावद्वि-
शतित्रिंशच्चत्वारिंशत्पंचाशद्योजनविस्तारा यावद्द्वादशयोजनोद्वे-
धाः[?] सर्वाश्च ता नद्यः सुखवाहिन्यो नानासुरभिगंधवारिवाहिन्यो

[1] [illegible] A. B. C. [illegible] [2] [illegible] [3] [illegible] A. [illegible] [4] [illegible]
[5] [illegible] A. B. C. [6] [illegible] [7] [illegible] A. [illegible]
[8] [illegible] [10] [illegible] [11] [illegible] A. C. [illegible]
[illegible]

नानारत्नलुडितपुष्पसंघातवाहिन्यो नानामधुरस्वरनिर्घोषाः । तासां चानंद कोटीगतसहस्रांगसंप्रयुक्तस्य दिव्यसंगीतिसंमूर्छितस्य[1] तूर्यस्य कुशलैः संप्रवादितस्य तावन्मनोज्ञघोषो निश्चरति[2] यथारूपस्तासां महानदीनां निर्घोषो निश्चरति गंभीरोऽज्ञेयोऽविज्ञेयोऽनेलः[3] कर्णसुखो हृदयंगमः प्रेमणीयो वल्गुर्मनोज्ञोऽसेचनकोऽप्रतिकूलः श्रवणायानित्यं[4] शांतमनात्मेति सुखश्रवणीयो यस्तेषां सत्त्वानां श्रोत्रेंद्रियाभासमागच्छति ॥ तासां खलु पुनरानंद महानदीनामुभयतस्तीराणि नानागंधरत्नवृक्षैः[5] संततानि येभ्यो नानाशाखापत्त्रपुष्पमंजर्योऽवलंबंते[6] । तत्र ये सत्त्वास्तेषु नदीतीरेष्वाकांक्षंति दिव्याभिरामरमणीयां रतिक्रीडां चानुभवितुं तेषां तत्र नदीप्रवतीर्णानामाकांक्षतां गुल्फमात्रं वारि संतिष्ठते । आकांक्षतां जानुमात्रं कटिमात्रं कक्षमात्रमाकांक्षतां कर्णमात्रं वारि संतिष्ठते दिव्याश्च रतयः प्रादुर्भवंति । तत्र ये सत्त्वा आकांक्षंति शीतं वारि भवत्विति तेषां शीतं वारि भवति । य आकांक्षंत्युष्णं भवत्विति तेषामुष्णं भवति । य आकांक्षंति शीतोष्णं भवत्विति तेषां शीतोष्णमेव तद्वारि भवत्यनुसुखं । ताश्च महानद्यो दिव्यतमालपत्त्रागरुकालानुसारितगंरोरगसारचंदनवरगंधवासितवारिपरिपूर्णाः प्रवहंति दिव्योत्पलपद्मकुमुदपुंडरीक-

[1] समुच्छ्रितस्य A. C. P. समुच्छ्रितैस्य B [2] Cf. the small Sukhâvatîvyûha, 7th paragraph, where we read: तद्यथापि नाम शारिपुत्र कोटिशतसहस्राङ्गिकस्य दिव्यस्य तूर्यस्य चार्यैः संप्रवादितस्य वल्गुर्मनोज्ञः शब्दो निश्चरति। [3] ऽनेलः A. B. ऽनलः C. ऽजनल P., is it for ऽनेडः? [4] ऽनित्य B. ऽथिंत्य P. [5] सम B. [6] ऽप्रलंबन्ते A. C. ऽवरबन्ते B. ऽवलाबन्ते P. [7] पत्त्र left out in A. B. [8] ग deest in B.

सौगंधिकादिपुष्पसंछन्ना हंससारसक्रौंचचक्रवाककारंडकशुकशा- २०
रिककोकिलकुणालकलविंकमयूरादिमनोज्ञस्वरास्तत्रपागताभि-
निर्मितपक्षिसंघनिषेवितपुलिना धातुराष्ट्रोपशोभिताः सुपतीर्था
विकर्दमाः सुवर्णवालुकासंकीर्णाः। तत्र यदा ते सत्त्वा आकांक्षंति
कीदृशा अस्माकमभिप्रायाः परिपूर्यंतामिति तदा तेषां तादृशा
एवाभिप्राया परिपूर्यंते। यथासावानंद तस्य वारिणो निर्घोषः
स मनोज्ञो निश्चरति येन सर्वावसंबुद्धक्षेत्रमभिज्ञाप्यते। ये च
सत्त्वा नदीतीरेषु स्थिता आकांक्षंति मास्माकमयं शब्दः श्रोत्रेंद्रि-
यावभासमागच्छत्विति तेषां न दिव्यस्यापि श्रोत्रेंद्रियस्यावभास-
मागच्छति। यश्च यथारूपं शब्दमाकांक्षति श्रोतुं स तथारूपमेव
मनोज्ञं शब्दं शृणोति। तद्यथा। बुद्धशब्दं धर्मशब्दं संघशब्दं

[1] [illegible] A B [illegible] C. P. [2] [illegible] A [illegible] B [illegible] C P. Cf. the [illegible] [illegible] ath paragraph, where we read, [illegible] [illegible] I.e. [illegible], easy to drink. [4] [illegible] A B [illegible] C [illegible] P. [5] After [illegible] all the MSS [illegible] [illegible] A C. [illegible] B. [illegible] [illegible] A B P. [6] [illegible]

[illegible]

[illegible] various readings of the four MSS., as here put together [illegible] [illegible] of restoring the text. We can gather from [illegible] [illegible] Chinese translation that he discovered in the text before him was that [illegible] [illegible] and of the river, need not hear it, even if they were possessed of [illegible] hearing which enables a man to hear everything [illegible] been restored conjecturally, though with sufficient certainty [illegible]

पारमिताशब्दं भूमिशब्दं[1] बलशब्दं वैशारद्यशब्दमावेणिकबुद्धधर्मशब्दं प्रतिसंविच्छब्दं शून्यतानिमित्ताप्रणिहितानभिसंस्काराजातानुत्पादाभावनिरोधशब्दं शांतप्रशांतोपशांतं[2] महामैत्रीमहाकरुणामहामुदितामहोपेक्षाशब्दमनुत्पत्तिकधर्मक्षांत्यभिषेकभूमिप्रतिलंभशब्दं[3]। श्रुत्वोदारप्रीतिप्रामोद्यं प्रतिलभते विवेकसहगतं विरागसहगतं शांतसहगतं निरोधसहगतं धर्मसहगतं बोधिपरिनिष्पत्तिकुशलमूलसहगतं च ॥ सर्वशश्चानंद सुखावत्यां लोकधातावकुशलशब्दो नास्ति सर्वशो नीवरणशब्दो[5] नास्ति सर्वशोऽपायदुर्गतिविनिपातशब्दो नास्ति सर्वशो दुःखशब्दो नास्ति। अदुःखासुखवेदनाशब्दोऽपि तावदानंद तत्र नास्ति कुतः पुनर्दुःखशब्दो[6] भविष्यति। तदनेनानंद पर्यायेण सा लोकधातुः सुखावतीत्युच्यते संक्षिप्तेन न पुनर्विस्तरेण। कल्पोऽप्यानंद परिक्षयं गच्छेत्सुखावत्या लोकधातोः सुखकारणेषु परिकीर्त्यमानेषु न त्वेव शक्यं तेषां सुखकारणानां पर्यंतमधिगंतुं ॥१८॥

तस्यां खलु पुनरानंद सुखावत्यां लोकधातौ ये सत्त्वाः प्रत्याजाताः प्रत्याजनिष्यंते[7] सर्वे त एवंरूपेण वर्णेन बलेन[8] स्थामारोहपरिणाहेनाधिपत्येन पुण्यसंचयेनातिष्णाभिर्वस्त्राभरणोद्यानविमानकूटागारपरिभोगैरेवंरूपशब्दगंधरससस्पर्शपरिभो-

[1] भूमिशब्दं left out in A B C [2] प्रशांतप्रशांतो A C P. प्रशांतप्रशांतो B. [3] भूमिका left out in B. [4] शांन्दं शृणोति न स्वं P [5] नीवरण, see Childers, Pāli Dict., p. 293b [6] पुन दुःखं दुःखशब्दो A. पुनर्दुःखं शब्दो B पुनर्दुःख दुःखशब्दो C. पुनः दुःखशब्दो P. [7] A adds तेषां, B. C. P. तेषां [8] बलेण B Deest in P
[9] वर्णाभिर्वस्त्रैस्त्रा A. B C. येन वर्तिष्णाभिः वस्त्रा P. नःर्हभिर्?

गैरेवंरूपैश्च सर्वैरपि भोगपरिभोगैः[1] समन्वागताः तद्यथापि[2] नाम देवाः परनिर्मितवशवर्तिनः ॥ न खलु पुनरानंद सुखावत्यां लोकधातौ सत्त्वा औदारिकमूपफाणीकाराहारमाहरंति[3] अपि तु खलु पुनर्यथारूपमेवाहारमाकांक्षंति तथारूपमाहृतमेव संजानंति[4] प्रीणितकायाश्च भवंति प्रीणितमानाः[5]। न तेषां भूयः काये प्रक्षेपः करणीयः ॥ ते प्रीणितकायास्तथारूपाणि गंधजातान्याकांक्षंति वेदूर्यैरेव[6] गंधजातैर्दिव्यैस्तद्बुद्धक्षेत्रं सर्वमेव निर्धूपितं भवति । तत्र यस्ते गंधमाघ्रातुकामो भवति तस्य सर्वशो गंधर्वराज्ञो[7] वासना नसमुदाचरति। एवं ये[8] यथारूपाणि गंध- [illegible] तेषां [illegible] -याकांक्षंति नानावर्णान्यनेकशतसहस्रवर्णानि तेषां तादृशैरेव चीवररत्नैः सर्वं तद्बुद्धक्षेत्रं परिस्फुटं भवति । प्रावृतमेव चात्मानं संजानंति । ते यथारूपाण्याभरणान्याकांक्षंति तद्यथा शीर्षाभरणानि वा कर्णाभरणानि वा ग्रीवाभरणानि वा हस्तपादाभरणानि [10]या यदिदं मुकुटानि कुंडलानि कटककेयूराणि वत्सहारा रुचकहारा कर्णिका मुद्रिकाः स्वर्णसूत्राणि मेखलाः [11]स्वर्णसूत्रा-

[1] भोगपरि deest in C. [2] यपि P. [3] औदारिकुकवडी A. C. औदारिकुकवडो B औदारिकुकवडि P [4] कारहारा A. B. C. काराहारा P. See Lal Vist., p. 331, ll. 5-7 [5] संजानंति A B C. [6] मानाः A. B. C. P. मनसः? [7] वेदूर्यैरेव P. वेदूर्यैरेव A B C. [8] गंधर्वराज्ञो A. B. P. गंधे च राजा C. [9] ये न A. B. [10] वा यदिदं A. C. या यदिदं B. वा वा यदिदं P. [11] स्वर्णसूत्राणि जालानि A. B. C. स्वर्णसूत्राणी जालानि P.

णि जालानि मुक्ताजालानि सर्वरत्नजालानि स्वर्णरत्नकिंकिणीजालानि तथारूपैराभरणैरनेकरत्नशतसहस्रप्रत्युप्तैः स्फुटं तद्बुद्धक्षेत्रं पश्यंति यदिदमाभरणवृक्षावसक्तैस्तैश्चाभरणैरलंकृतमात्मानं संजानंति ॥ ते यादृशं[1] विमानमाकांक्षंति यद्वर्णलिंगसंस्थानं यावदारोहपरिणाहं नानारत्नमयनिर्यूहशतसहस्रसमलंकृतं नानादिव्यपुष्पसंस्तीर्णं चित्रोपधानविन्यस्तपर्यंकं तादृशमेव विमानं तेषां पुरतः प्रादुर्भवति । तेषु मनोनिर्वृतेषु विमानेषु सप्तसप्ताप्सरसहस्रपरिवृताः[3] पुरस्कृता विहरंति क्रीडंति रमंते परिचारयंति ॥१९॥

न च तत्र लोकधातौ देवानां वा मनुष्याणां वा नानात्वमस्त्यन्यत्र संवृतिव्यवहारेण देवमनुष्याविति संख्यां गच्छंति ॥ तद्यथानंद राज्ञश्चक्रवर्तिनः पुरतो मनुष्यहीनो मनुष्यप्रेतको[4] न भासते न तपते न विरोचते [5]न च भवति विशारदो न प्रभास्वरः एवमेव देवानां परनिर्मितवशवर्तिनां पुरतः शक्रो देवानामिंद्रो न भासते न तपते न विरोचते यदिदमुद्यानविमानवस्त्राभरणैरधिपत्येनर्द्ध्या वा [6]प्रातिहार्येण वैश्वर्येण वानंद स खलु धर्माभिसमयेन धर्मपरिभोगेण वा । तत्रानंद यथा देवाः परिनिर्मितवशवर्तिन एवं सुखावत्यां लोकधातौ मनुष्या द्रष्टव्याः ॥२०॥

[1] यादृश A. P. यावद्दश B यादृशं C. [2] दुःप्प A. दुप्प B. C दुःप्प P.
[3] निर्वृताः A. B. C. वृत्ताः P. [4] प्रेतको A B. C P Bodhiruki gives the transliteration 半托迦 Pan-tho-kia, i.e. पंडक, which would be better. [5] From न च भवति to भासते left out in P [6] प्रतिहार्येण A. P प्रातिभार्येण B प्रातिहार्येण C

तस्यां खलु पुनरानंद सुखावत्यां लोकधातौ पूर्वाह्णकाल-
समये प्रत्युपस्थिते[1] समंताच्चतुर्दिशमाकुलाः समाकुला वायवो
वांति । तेषां [2]रत्नवृक्षाणां चित्रान्दर्शनीयान्नानावर्णाननेक-
वर्णान्नानासुरभिदिव्यगंधपरिवासितान्क्षोभयंति संक्षोभयंतीरयंति
समीरयंति यतो बहूनि पुष्पशतानि तस्यां रत्नमय्यां महापृथिव्यां
प्रपतंति मनोज्ञगंधानि दर्शनीयानि । तैश्च पुष्पैस्तद्बुद्धक्षेत्रं
समंतात्सप्तपौरुषं संस्कृतरूपं भवति । तद्यथापि नाम पुरुषः
कुशलः पृथिव्यां पुष्पसंस्तरं संस्तृणुयादुभाभ्यां पाणिभ्यां समं
रचयेत्सुचित्रं दर्शनीयं एवमेव तद्बुद्धक्षेत्रं तैः पुष्पैर्नानागंधवर्णैः
समंतात्सप्तपौरुषं स्फुटं भवति । तानि च पुष्पजातानि मृदूनि
काचिलिंदिकसुखसंस्पर्शान्यौपम्यमात्रेण यानि निक्षिप्ते पादे
चतुरंगुलमवनमंति उत्क्षिप्ते पादे चतुरंगुलमेवोन्नमंति ॥ निर्गते
पुनः पूर्वाह्णकालसमये तानि पुष्पाणि निरवशेषमंतर्धीयंते ।
अथ तद्बुद्धक्षेत्रं विविक्तं रम्यं शुभं भवत्यपरिक्लिष्टैः पूर्वपुष्पैः ।
ततः पुनरपि समंताच्चतुर्दिशं वायवो वांति ये पूर्ववदभिनवानि
पुष्पाण्यभिप्रकिरंति । यथा पूर्वाह्ण[3] एवं मध्याह्नकालसमये
संध्यायां रात्र्याः[4] प्रथमे यामे मध्यमे यामे पश्चिमे यामे । तैश्च

[1] पूर्वाह्णे A. B. C. P. [illegible] A. P. [illegible] [illegible]
[2] [illegible] A. C. [illegible] B. [illegible] [illegible]
B. [illegible], which has been substituted [illegible] may have been originally [illegible] and [illegible] [illegible] A. B. C. P. [illegible] A. B. C. P. [illegible] A. B. C. P. [illegible] A. C. B. [illegible]

वातैर्वायद्भिर्नानागंधपरिवासितैस्ते सत्त्वाः स्पृष्टाः संत एवं सुख-समर्पिता भवंति तद्यथापि नाम निरोधसमापन्नो भिक्षुः ॥२१॥

तस्मिंश्चानंद बुद्धक्षेत्रे सर्वशोऽग्निसूर्यचंद्रग्रहनक्षत्रताराइ-[illegible] तमोऽंधकारस्य नामधेयप्रज्ञप्तिरपि नास्ति सर्वशो रात्रिं-दिवं प्रज्ञप्तिरपि नास्त्यन्यत्र तथागतव्यवहारात् सर्वशश्चाराम-[illegible] नास्ति ॥२२॥

तस्यां खलु पुनरानंद सुखावत्यां लोकधातौ काले दिव्य-गंधोदकमेघा [illegible] दिव्यानि सर्ववर्णिकानि कुसुमानि दिव्यानि [illegible] दिव्यं चंदनचूर्णं दिव्याश्छत्रध्वजपताका [illegible] । दिव्यानि सर्ववर्णिकानि कुसुमानि दिव्यानि [illegible] दिव्यानि [illegible] सर्वाभरणान्याकाशे [illegible] दिव्यानि [illegible] दिव्याश्चाप्सरसो नृत्यंति ॥२३॥

[illegible] पुनरानंद बुद्धक्षेत्रे ये सत्त्वा उपपन्ना उत्पद्यंते [illegible] सर्वे ते नियताः सम्यक्त्वे यावन्निर्वाणं । तत्कस्य [illegible] राश्योर्व्यवस्थानं प्रज्ञप्तिर्वा यदिदमनि-[illegible] वा । तदनेनाप्यानंद पर्यायेण सा [illegible] संक्षिप्तेन न पुनर्विस्तरेण । कल्पो [illegible] लोकधातौ सुखकारणेषु परि-

[illegible]

कीर्त्यमानेषु न च तेषां सुखकारणानां शक्यं पर्यंतमधि-
गंतुं ॥२४॥

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा[1] अभाषत ।

सर्वेऽपि सत्त्वाः सुखिता भवेयुर् ।
विशुद्धज्ञानाः परमार्थकोविदाः ।
ते कल्पकोटीमथ वापि चोत्तरिं ।
सुखावतीवर्णं प्रकाशयेयुः ॥१॥
क्षये कल्पकोटी वज्जे सुराष्ट्र[2] ।
सुखावतीये न च वर्णसारः[3] ।
क्षयं न गच्छेत्प्रतिभा च तेषां[4] ।
प्रकाशयंतान तु[5] वर्ण नानां[6] ॥२॥
ये लोकधातू [7]परमाणुसादृशां[8] ।
च्छिद्येय भिद्येय रजश्च[9] कुर्यात् ।

[1] मा गाथा A B मां गाथा C मा गाथां P.
[2] ...यकल्पकोटीवज्रे सुराष्ट्र B. क्षयकल्पकोटीवज्रे सुराष्ट्र C. ये कल्पकोटीवज्रे सुराष्ट्र P. [2] क्षयकल्पकोटीवज्रे सुराष्ट्र A ...e want to restore the metre, we might read क्षयं व्रजेत्कल्पकोटी सुराष्ट्र, though the short e ...ould be irregular, or, allowing still greater metrical license, we might conjecture क्षये ...ल्पकोटी वज्रासनं च, i e 'A kalpakoṭi may perish and the diamond seat,' using kshaye ... kshayet as one syllable, and वज्र as trisyllabic.
[3] ...ः meant for सारः, i e सारः, or is it meant for चारुः or चरुः? [3] सुरुः A C. P. चारुः B In ...ga, l. 10.
[4] तु deest in B.
[5] वर्ण नानां, either वर्ण नाना or perhaps वर्णनानां.
[6] See Lal Vist. ...om परमाणु to लोकधातु left out in P.
[7] For सादृशां, see Childers' Pâli Dict ..., col. 21 for paramâsuragga, Lal Vist. p 171, l 13
[8] ...
[9] रजश्च A B, P ... C.

अतो बहू उत्तरि लोकधातु।
पूरेत दानं रतनाहि[1] दद्यात् ॥३॥
नैता कलापि[2] उपमापि तस्य।
पुण्यस्य[3] भोंती[4] पृथुलोकधातवः[5]।
ये[6] लोकधातूय सुखावतीये।
श्रुत्वैव नामं भवतीह पुण्यं ॥४॥
ततो बहू पुण्य[7] भवेत तेषां[8]।
ये श्रद्दते[9] जिनवचनं[10] समन्तात्।
श्रद्धा हि[11] मूलं जगतस्य प्राप्तये[12]।
तस्माद्धि[13] श्रुत्वा विचितिं[14] विनोदयेदिति ॥५॥

एवमप्रमेयगुणवर्णानंद सुखावती लोकधातुः[15] ॥२५॥

तस्य खलु पुनरानंद भगवतो[16]ऽमिताभस्य तथागतस्य[18] दशसु दिक्ष्वेकैकस्यां दिशि गंगानदीवालुकासमेषु बुद्धक्षेत्रेषु गंगानदीवालुकासमा बुद्धा भगवंतो नामधेयं परिकीर्तयंते वर्णं भाषंते

[1] पुरन्तदानं रत्नो A. पुरं तदानं रत्ना B पूरेन्तदानं न तनो C. पूरेन्तदानं रतनो P. [2] कलापि A. B. P. कलापि C; meant for कलापी. [3] पुण्यस्य B; deest in P. [4] भोन्ती A. C. भोन्ति B P. [5] धातुवः B. धातवे: C [6] ये A. B. C. P.; one expects य or यत्. [7] पुण्यं C. [8] भवेत् तेषां A. भवेत तेषां B. P. भवेत् । तेषां C. भवेय? [9] श्रधते A श्रद्दधे B C. P. [10] जिनवचन A. B जिनवचन C. जिनवल P. [11] हि deest in P. [12] प्राप्तये A. C. प्राप्तयें B. प्राप्त ॥ ये P. [13] तस्माधि A. तस्माद्धि B. C. तस्माद्धि P [14] विचितिं A. C. चि B. विचित P. [15] धर्मेमा A. B. C. धर्मे ... P. [16] लोकधातोः A. B C. [17] भगवतो left out in A. B. [18] तथा- ... in A. B C.

मनः प्रकाशयंति गुणमुदीरयंति। तत्कस्य हेतोः। ये केचित्सत्त्वा-
स्तस्य भगवतोऽमिताभस्य नामधेयं शृण्वंति श्रुत्वा चांतश एक-
चित्तोत्पादमप्यध्याशयेन प्रसादसहगतेन चित्तमुत्पादयंति [1]ते सर्वे
ऽवैवर्तिकतायां संत्यनुत्तरायाः सम्यक्संबोधेः ॥२६॥

ये चानंद केचित्सत्त्वास्तं तथागतं पुनः[2] सत्कारमनसिकरिष्यंति
बहुपरिमितं[3] कुशलमूलमवरोपयिष्यंति बोधये चित्तं परिणाम्य
तत्र च लोकधातावुपपत्तये प्रणिधास्यंति तेषां सोऽमिताभस्तथा-
गतोऽर्हन्सम्यक्संबुद्धो मरणकालसमये प्रत्युपस्थिते[4]ऽनेकभिक्षु-
गणपरिवृतः पुरस्कृतः[5] स्थास्यति। ततस्ते तं भगवंतं दृष्ट्वा प्रसन्न-
चित्ताश्च्युताः संतस्तत्रैव सुखावत्यां लोकधातावुपपत्स्यंते। यथा-
नंदाकांक्षेत[6] कुलपुत्रो वा कुलदुहिता वा किमित्यहं दृष्ट एव धर्मे
तममिताभं तथागतं[7] पश्येयमिति तेनानुत्तरायां सम्यक्संबोधौ
चित्तमुत्पाद्याध्याशयातिशयतया संतत्या तस्मिन्बुद्धक्षेत्रे चित्तं
संप्रेष्योपपत्तये कुशलमूलानि च[9] परिणामयितव्यानि ॥२७॥

ये पुनस्तं तथागतं न भूयो मनसिकरिष्यंति न च बहुपरि-
मितं कुशलमूलमभीक्ष्णमवरोपयिष्यंति[10] तेषां तादृशेनैव[11] सो
ऽमिताभस्तथागतोऽर्हन्सम्यक्संबुद्धो वर्णसंस्थानारोहपरिणाहेन

[1] From ते to संति left out in C. सर्वे ते P. [2] P. adds पुर before सत्कारं. Could it be पुनः पुनः सत्कारं? [3] बहुपरिमितं A. बहुपरिमितं B. बहुपरिमितं C. बहुपरिमितं P. [4] सो B. [5] One expects पुरतः, see p. 14, l. 16; p. 48, l. 2. [6] क्षेत्. P. क्षत A. B. C. [7] तथागत A. B. C. P. [8] स चाध्याशयेन P. चाध्याशयेन। चाध्याशयेन B. [9] वा A. B. C. [10] भिक्षुण A. B. भीक्ष्ण C. P. [11] P. adds न तत्र च बुद्धक्षेत्रे चित्तं संप्रेषयंति (i.e. संप्रेष्य). [12] तादृशेनैव A. तादृशेनैव B. C. P.

वहुगंधपूटी[1] गृहीत्वा।
नानावर्णे[2] सुरभी[3] मनोरमां।
ओकिरंति नरनायकोत्तमं।
अमितायु नरदेवपूजितं ॥४॥
पूजित्व[4] वा ते वहुवोधिसत्त्वा।
वंदित्व पादाममितप्रभस्य।
प्रदक्षिणीकृत्य वदंति चैवं।
अहोऽद्भुतं शोभति वुद्धक्षेत्रं ॥५॥
ते पुष्पपूटीहि पुनोकिरंति।
उदग्रचित्ता अतुलाय प्रीतिये।
कामं प्रभाषंति पुरस्तनायके[5]।
अस्मापि क्षेत्रं[6] सिय एवरूपं[7] ॥६॥
ये पुष्पपूटा इति क्षिप्त तत्र।
छत्रंतदा संस्थिहि योजनाशतं।
स्वलंकृतं शोभति चित्रदंडो[11]।
छादेति वुद्धस्य समंतकायं ॥७॥
ते वोधिसत्त्वा तत्र सत्करित्वा।
कथं करोंती इति तुष्ट तत्र।

[1] ट्टी॰ P [2] हि P [3] मानवर्णे A. [4] भि A. B P. [5] द्भो P
[6] भि॰ A. B. C. P. [7] From वर्ण to मनो left out in P. [8] च A. B. C. P.
[9] पिंडेकवर्णं A.; doest in P फि वरदरं B फिय वरदरं C. [10] नं A. B. C. P.
[11] फि चित्रघटो A. फि चित्रघटे B. फि चित्रघटो P. फि चित्रघटो C. The letters are not quite clear, we expect चित्र घोषं, or शोभति चित्रकैः.

सुलब्ध लाभाः खलु तेहि सत्त्वैः।
येही श्रुतं नाम नरोत्तमस्य ॥८॥
अस्मेहि' पी' लाभ सुलब्धपूर्वा।
यदा गतास्य' इम बुद्धक्षेत्रं।
पश्याथ स्वप्नोपम मेष कीदृशं।
यत्कल्पितं कल्पसहस्रशास्तुः' ॥९॥
पश्याथ बुद्धा वर' पुण्यराशिः।
परिवृतो' शोभति बोधिसत्त्वैः।
अमिताभस्य आभा' अमिता च तेजा।
अमितं च आयूरमितश्च संघः ॥१०॥
स्मितं' करोती अमितायुनाथः।
षट्त्रिंश[11]कोटीनयुतान अर्चिषां[12]।
ये निश्चरित्वा मुखमंडलातः।
स्फुरंति क्षेत्राणि सहस्रकोटीः[13] ॥११॥
ता. सर्वसूरीः[14] पुनरेत्य तत्र।
मूर्ध्न च अस्तं गमि नायकस्य।

पि P ³ गता सा? ⁴ य क A. C. ये क B
वल A B ⁷ परिवृता P.; scan परीवृतो. ⁸ शास्तु A
⁹ आयूर. Long and short u are difficult to distinguish; the ⁹ Scan
¹⁰ स्मितं A. B. स्मितं C. स्मित P. ¹¹ ग्रत B.
¹³ टी: P. टा: B. टी C.; deest in A. ¹⁴ सुरी: A. C. P.
मूर्ध्ने A B र्ध्ने C. र्ध्न P.

देवा मनुष्या जनयंति प्रीतिं ।
अर्चिस्तदा अस्यमिदां[1] विदित्वा ॥१२॥
उत्तिष्ठते बुद्धसुतो महायशा ।
नाथ सो हि अवलोकितेश्वरः ।
को हेतुरत्र भगवं कः प्रत्ययो ।
येन स्मितं कुर्वसि लोकनाथ ॥१३॥
तं व्याकरोही मम सोऽर्थकोविदो ।
हितानुकंपी बहुसत्त्वमोचकः ।
श्रुत्वेति[4] वाचं परमां मनोरमां ।
उदग्रचित्ता भविष्यंति सत्त्वाः ॥१४॥
ये बोधिसत्त्वा बहुलोकधातुतः[5] ।
सुखावतीं प्रस्थित बुद्धपश्यतां ।
ते श्रुत्वा प्रीतिं विपुलां जनेत्वा ।
क्षिप्रमिमं क्षेत्र विलोकयेयुः ॥१५॥
आगत्य च[6] क्षेत्रमिदं उदारं ।
ऋद्धीबलं प्राप्नुणि[7] क्षिप्रमेव ।
दिव्यं च चक्षुस्तथ श्रोत्र दिव्यं ।
जातिस्मराः पारमिकोविदाश्च[8] ॥१६॥

[1] अर्चिस्त A. B. C. अस्त P. [2] स्म P. [3] स्त P. [4] श्रुत्वाति A. P. श्रुत्वेति B. श्रुत्वा C. [5] धातुषः A. B. C. धातवः P. [6] Both च before क्षे and दं must be scanned long. [7] प्रानि P. [8] परमार्थिविदाश्च A. परमार्थविदाश्च B. परमार्थिविदाश्च C. परमकोविदाश्च P.

॥ सुखावतीव्यूहः ॥

अमितायु बुद्धस्तद् व्याकरोति।
मम ह्ययं प्रणिधि बभूव[1] पूर्वं।
कथं पि सत्त्वा श्रुणियानि नाम।
व्रजेयु क्षेत्रं मम नित्यमेव॥१७॥
स मे ह्ययं प्रणिधि [2]प्रपूर्ण शोभना।
सत्त्वाश्च एभि बहुलोकधातुतः।
आगत्य क्षिप्रं मम अंतिकस्मिं।
अवैवर्तिका[3] भोंतिह एकजातिया॥१८॥
तस्माद्य इच्छतिह बोधिसत्त्वः।
ममापि क्षेत्रं सिय एवरूपं।
अहं पि सत्त्वान्बहु मोचयेयं।
नामेन[4] घोषेण च[5] दर्शनेन॥१९॥
स[6] शीघ्रंशीघ्रं त्वरमाणरूपः।
सुखावतीं गच्छतु लोकधातु।
गत्वा च पूर्णममितप्रभस्य।
पूजेतु बुद्धान सहस्रकोटीः॥२०॥
बुद्धान कोटी बहु पूजयित्वा।
ऋद्धीबलेन बहु क्षेत्र गत्वा।

[1] [illegible] A C F बभूव B. scanned as ⏑ ⏑ – ⏑ – [2] [illegible] A. B. C. [3] अवैवर्तिका A B C F [4] नामे B [5] [illegible] A B C. [6] [illegible] [7] [illegible] A D

कृत्वान पूजां सुगतान[1] संतिके।
भक्त्या गमिष्यंति सुखावती त इति ॥२१॥३१॥

तस्य खलु पुनरानंदामितायुषस्तथागतस्यार्हतः सम्यक्संबुद्धस्य बोधिवृक्षः। स दश योजनशतान्युच्चैस्त्वेनाष्टौ योजनशतान्यभिप्रलंबितशाखापत्रपलाशः पंचयोजनशतमूलारोहपरिणाहः सदापत्रः सदापुष्पः सदाफलो नानावर्णोऽनेकशतसहस्रवर्णो नानापत्रो[3] नानापुष्पो नानाफलो नानाविचित्रभूषणसमलंकृतश्चंद्रभासमणिरत्नपरिस्फुटः शक्राभिलग्नमणिरत्नविचित्रितश्चिंतामणिरत्नाकीर्णः सागरवरमणिरत्नसुविचित्रितो दिव्यसमतिक्रांतः स्वर्णसूत्राभिप्रलंबितो रुचकहाररत्नहारवत्सहारकटकहारलोहितमुक्ताहारनीलमुक्ताहारसिंहलतामेखलाकलापरत्नसूत्रसर्वरत्नवस्तुशताभिविचित्रितः स्वर्णजालमुक्ताजालसर्वरत्नजालकिंकिणीजालततो[7] मकरस्वस्तिकनंद्यावर्तचंद्रसमलंकृतः किंकिणीमणिजालसौवर्णसर्वरत्नालंकारविभूषितो यथाशयसत्त्वविज्ञप्तिसमलंकृतश्च ॥ तस्य खलु पुनरानंद बोधिवृक्षस्य वातसमीरितस्य यः शब्दो घोषो निश्चरति सोऽपरिमाणाँल्लोकधातून्विज्ञापयति। तत्रानंद येषां सत्त्वानां स बोधिवृक्षः श्रोत्रावभासमागच्छति तेषां श्रोत्ररोगो न प्रतिकांक्षितव्यो

[1] शार A. B P [2] द्रुम A. B. द्रुमे C. रूमे P. [3] नानापत्रो deest in C. [4] रत्नरत्नहार C. रत्नहाररत्नहार deest in P. [5] नीलमुक्ताहार P. [6] वरत्न deest in B. [7] जाल ततः A. C जालः ततः B. जाल च ततः P [8] नंद्यावर्तचंद्र P [9] यथा deest in C.

यावद्बोधिपर्यंतं । येषामप्रमेयासंख्येयाचिंत्यातुल्यामाप्यापरिमाणानभिलाप्यानां सत्त्वानां स बोधिवृक्षश्चक्षुष आभासमागच्छति तेषां चक्षूरोगो न प्रतिकांक्षितव्यो यावद्बोधिपर्यंतं । ये खलु पुनरानंद सत्त्वास्ततो बोधिवृक्षाद्गंधं जिघ्रंति तेषां यावद्बोधिपर्यंतं न जातु घ्राणरोगः प्रतिकांक्षितव्यः। ये सत्त्वास्ततो बोधिवृक्षात्फलान्यास्वादयंति[1] तेषां यावद्बोधिपर्यंतं न जातु जिह्वारोगः प्रतिकांक्षितव्यः। ये सत्त्वास्तस्य बोधिवृक्षस्याभया स्फुटा भवंति तेषां यावद्बोधिपर्यंतं न जातु कायरोगः प्रतिकांक्षितव्यः। ये च[2] खलु पुनरानंद सत्त्वास्तं बोधिवृक्षं धर्मतो निध्यायंति तेषां तत उपादाय यावद्बोधिपर्यंतं न जातु चित्तविक्षेपः प्रतिकांक्षितव्यः। सर्वे च ते सत्त्वाः सहदर्शनात्तस्य बोधिवृक्षस्यावैवर्तिकाः संतिष्ठंते यदुतानुत्तरायाः सम्यक्संबोधेः। तिस्रश्च क्षांतीः प्रतिलभंते यदिदं घोषानुगामनुलोमिकीमनुत्पत्तिकधर्मक्षांतिं[3] च तस्यैवामितायुषस्तथागतस्य पूर्वप्रणिधानाधिष्ठानेन पूर्वजिनकृताधिकारतया पूर्वप्रणिधानपरिचर्यया च सुसमाप्तया सुभावितयानूनाविकलतया ॥३२॥

तत्रैव खलु पुनरानंद ये बोधिसत्त्वाः प्रत्याजाताः प्रत्याजायंते प्रत्याजनिष्यंते वा सर्वे त एकजातिप्रतिबद्धास्तत एवानुत्तरां सम्यक्संबोधिमभिसंभोत्स्यंते स्थापयित्वा प्रणिधानवशं[4] ये ते

[1] बोधिवृक्षफलान्या P. [2] च B. [3] घोषानुगामनुलो A. B. C. घोषानुगा अनुलो P.
[4] वशं A B C वशेन P विशेषात्? see p. 15, l. 9.

[illegible]

[illegible]

[illegible]

[illegible]

वर्तमानेषु यदा बुद्धानां भगवतां लोके प्रादुर्भावो भवति । तद्यथापि नाम मयैतर्हि ॥३६॥

तस्मिन्खलु पुनरानंद बुद्धक्षेत्रे ये बोधिसत्त्वाः[1] प्रत्याजाताः सर्वे त एकपुरोभक्तेनान्याँल्लोकधातून्गत्वानेकानि बुद्धकोटीनियुतशतसहस्राण्युपतिष्ठंति यावदाकांक्षंति बुद्धानुभावेन । ते यथायथा चित्तमुत्पादयंति एवमेवंरूपैः[2] पुष्पधूपदीपगंधमाल्यविलेपनचूर्णचीवरछत्रध्वजपताकावैजयंतीतूर्यसंगीतिवाद्यैः पूजां कुर्याम इति तेषां सहचित्तोत्पादात्तथारूपाणि च सर्वपूजाविधानानि पाणौ प्रादुर्भवंति । ते तैः पुष्पैर्यावद्वाद्यैस्तेषु बुद्धेषु भगवत्सु पूजां कुर्वंतो बहुपरिमाणमसंख्येयं[3] कुशलमुपचिन्वंति । '[4]सचेत्पुनराकांक्षंत्येवंरूपाः पुष्पपुटाः पाणौ प्रादुर्भवंत्विति' तेषां सहचित्तोत्पादान्नानावर्णा अनेकवर्णा नानागंधा दिव्याः पुष्पपुटाः पाणौ प्रादुर्भवंति । ते तैस्तथारूपैः पुष्पपुटैस्तान्बुद्धान्भगवतो ऽवकिरंत्यभ्यवकिरंत्यभिप्रकिरंति । तेषां च यः सर्वपरीत्तः पुष्पपुट उत्सृष्टः स दशयोजनविस्तरं पुष्पछत्रं प्रादुर्भवत्युपर्यंतरीक्षे द्वितीये चानुत्सृष्टे न प्रथमो धरण्यां प्रपतति । संति तत्र पुष्पपुटा य उत्सृष्टाः संतो विंशतियोजनविस्ताराणि पुष्पछत्राण्युपर्यंतरीक्षे प्रादुर्भवंति । संति त्रिंशच्चत्वारिंशत्पंचाशद्योजनविस्ताराणि

[1] सत्त्वा A. B. C. बोधिसत्त्वाः P. [2] एवमेवंरूपै A. एवमेव रूपै B. C. P. [3] [illegible] A. C. P., deest in B. [4] From सचेत् to प्रादुर्भवंति left out in B. [5] [illegible] A. [illegible] C. [illegible] P. [6] [illegible] C. [7] [illegible] A. C. [illegible] B. [illegible] P.

संति यावद्योजनशतसहस्रविस्ताराणि पुष्पच्छन्नाण्युपर्यंतरीक्षे प्रादुर्भवंति । तत्र य उदारं प्रीतिप्रामोद्यं संजनयंति उदारं च चित्तोद्बिल्यं प्रतिलभंते ते बहुपरिमितमसंख्येयं कुशलमूलमवरोप्य बहूनि च बुद्धकोटीनियुतशतसहस्राण्युपस्थायिकपूर्वाह्णेन पुनरपि सुखावत्यां लोकधातौ प्रतिष्ठंते तस्यैवामितायुषस्तथागतस्य पूर्वप्रणिधानाधिष्ठानपरिग्रहेण पूर्वदत्तधर्मश्रवणेन पूर्वजिनावरोपितकुशलमूलतया पूर्वप्रणिधानसमृद्धिपरिपूर्यात्मभूतया सुविभक्तभावितया[3] ॥ ३९ ॥

तस्मिन्खलु पुनरानंद बुद्धक्षेत्रे ये सत्त्वाः प्रत्याजाताः सर्वे ते सर्वज्ञतासहगतामेव धर्मकथां कथयंति । न च तत्र बुद्धक्षेत्रे सत्त्वानां काचित्परिग्रहसंज्ञास्ति ते सर्वे च तद्बुद्धक्षेत्रमनुचंक्रमाणा अनुविचरंतो न रतिं नारतिमुत्पादयंति प्रक्रामंतश्चानपेक्षा न च प्रक्रामंति सापेक्षाः[7] । सर्वसत्त्वेषामेव चित्तं नास्ति ॥ तत्र खलु पुनरानंद सुखावत्यां लोकधातौ ये सत्त्वाः प्रत्याजाता नास्ति तेषामन्यतमकसंज्ञा नास्ति स्वकसंज्ञा नास्त्यसमसंज्ञा नास्ति विग्रहो नास्ति विवादो नास्ति विरोधः। समचित्ता[9] मैत्रचित्ता मृदुचित्ताः स्निग्धचित्ताः कर्मण्यचित्ताः प्रसन्नचित्ताः[10] स्थिरचित्ता विनीव-

[1] From विस्तार to च्छ left out in B. [2] विस्तारि A विस्तारानिविस्तारि C. विस्तार्णविस्तीर्ण P [3] सुविभक्तया भविनया A. सुविभक्तया भाविनया B C सुविभक्तभावितया P [4] ये सर्वे च बुद्धक्षेत्रे A ये सर्वे च ते सत्त्वा बुद्ध B. ये सर्वे च बुद्ध C. सर्वेच बुद्ध P [5] क्रमा- A B C P [6] नो B. [7] न च प्रक्रामंति न सापेक्षाः A. B प्रक्रामंति C., deest in P [8] मार्दव मार्दव A मार्दव B P मार्दव चित्त C. [9] In Chinese, 'possessed of the thought of equalness' [10] प्रसन्नचित्ताः deest in A B

रणचित्ता अक्षुभितचित्ता अलुडितचित्ताः प्रज्ञापारमिताचर्याचरणचित्ताचित्तापारबुद्धिप्रविष्टाः सागरसमाः प्रज्ञया[1] मेरुसमा बुद्धानेकगुणसंनिचया बोध्यंगसंगीत्या विक्रीडिता बुद्धसंगीत्यभियुक्ता मांसचक्षुः प्रविचिन्वंति दिव्यं चक्षुरभिनिर्हरंति प्रज्ञाचक्षुर्गतिंगता धर्मचक्षुःपारगता[2] बुद्धचक्षुर्निष्पादयंतो दर्शयंतो द्योतयंतो विस्तरेण प्रकाशयंतोऽसंगज्ञानमभिनिर्हरंति। त्रैधातुकसमतायामभियुक्ता दांतचित्ताः शांतचित्ताः सर्वधर्मधातूपलब्धिसमन्वागताः समुदयनिरुक्तिकुशला धर्मनिरुक्तिसमन्वागता हाराहारकुशला नयानयकुशलाः स्थानकुशला लौकिकीषु कथास्वनपेक्षा विहरंति लोकोत्तराभिः कथाभिः सारं प्रत्ययंति। सर्वधर्मपर्येष्टिकुशलाः सर्वधर्मप्रकृतिव्युपशमज्ञानविहारिणोऽनुपलंभगोचरा निष्किंचना निरुपादाना निश्चिंता निरुपधयोऽनुपादाय सुविमुक्ता अनंगणा[5] अपर्यस्थायिनोऽभिज्ञास्वमूलस्थायिनोऽसंगाचारिका अनवलीना गंभीरेषु धर्मेष्वभियुक्ता न संसीदंति दुरनुबोधबुद्धज्ञानप्रवेशोद्गता एकायनमार्गानुप्राप्ता निर्विचिकित्सास्तीर्णकथंकथा अपरप्रत्ययज्ञाना अनधिमानिनः। सुमेरुसमा[7] ज्ञानाभ्युद्गताः। सागरसमा बुद्धाक्षोभ्याः[8]। चंद्रसूर्यप्रभातिक्रांताः प्रज्ञाभया पांडरसुशुक्लशुद्धशुभचित्ततया च। उत्तप्त-

[1] प्रेक्षया B [2] पारंगता A B C. पारगताः P. [3] मे A. B C. P. [4] सु deest in A B [5] असंगता P [6] शो A. B. C श्च P. [7] For comparisons of the same kind, see Lal. Vist. p. 550. [8] बुद्धाक्षोभ्याः A बुद्धाऽक्षोभ्या B. बुद्धाक्षोभ्याः C बुद्धाक्षोभ्याः P.

हेमवर्णसदृशा स्ववभासनिर्भासतया च । वसुंधरासदृशाः सर्वसत्त्व-
शुभाशुभक्षमणतया । अप्सदृशाः' सर्वक्लेशमूलनिधावनप्रवाहण-
तया च । अग्निराजसदृशाः सर्वधर्ममन्यनाक्लेशनिर्दहनतया ।
वायुसदृशाः सर्वलोकासंजनतया । आकाशसदृशाः सर्वधर्मनैर्वे-
धिकतया सर्वशो निष्किंचनतया च । पद्मसदृशाः सर्वलोकानु-
पलिप्ततया । कालानुसारिमहामेघसदृशा धर्माभिगर्जनतया ।
महावृष्टिसदृशा धर्मसलिलाभिप्रवर्षणतया । वृषभसदृशा महा-
गणाभिभवनतया । महानागसदृशाः परमसुदांतचित्ततया । भद्रा-
जानेयसदृशाः सुविनीततया । सिंहमृगराजसदृश विक्रमवै-
शारद्यसंपन्नतया । न्यग्रोधद्रुमराजसदृशाः सर्वसत्त्वपरित्राणतया ।
[illegible]सदृशाः सर्वपरप्रवाद्यकंपनतया । गगणसदृश अपरि-
माणमैत्रीस्फरणतया । महासमुद्रसमाः सर्वकुशलमूलधर्माधि-
[illegible] । पक्षिसदृशा असंनिचयस्थानतया । गरुडद्वि-
जराजसदृशाः सर्वपरप्रवादिविध्वंसनतया । उदुंबरपुष्पसदृशा
दुर्लभ[illegible] नागवत्समाहिता अविक्षिप्ताजितेंद्रियतया ।
[illegible] शांतिसौरभ्यबहुला ज्ञानीपुंकाः परसंपत्त्य-
[illegible] विशारदा धर्मकथास्वतृप्ता धर्मपर्येष्या'' वैडूर्यसदृशा

[illegible]

शीलेन रत्नाकराः[1] श्रुतेन मंजुस्वरा महाधर्मदुंदुभिनिर्घोषिणा महाधर्मभेरीं पराघ्नंतो महाधर्मशंखमापूरयंतो महाधर्मध्वज-मुच्छ्रापयंतो धर्मोल्कां प्रज्वालयंतः प्रज्ञाविलोकिनोऽसंमूढा निर्दोषाः शांतखिलाः शुद्धा निरामगंधा अलुब्धाः संविभागरता मुक्तत्यागाः प्रसृतपाणयो दानसंविभागरता धर्मामिषाभ्यां दाने ऽमत्सरिणोऽसंसृष्टा उच्चत्तमानसा[2] विरक्ता वीरा धीरा धृति-मंतो ह्रीमंतः सुव्यूढसत्त्वा निर्गादाः[3] प्राप्ताभिज्ञाः सुरताः सुरा-संवासा क्षेमंकरा लोकप्रद्योता नापदागंतुं[4] वीरा रागं तमः[5] प्रनेकलक्षणाः शोकांपगता निर्मला निमेषमहीणा विक्रीडिताभिज्ञा हेतुबलिकाः प्रणिधानबलिका अजिह्मा अकुटिला अंते लब्ध-कोटीनियुतशतसहस्रावरोपितकुशलमूला उत्पादितमानशल्या अपगतरागद्वेषमोहाः शुद्धाः शुद्धाधिमुक्ता जिनबलप्रणम्ना लो-कमंडिता उग्रप्रज्ञानसमुदागता[6] जिनसुताधिष्ठोद्धिल्लसमन्वागताः शूरा दृढा[7] असमा अखिला अतुला अरजस्का:[8] सहिता उदारा ऋषभा ह्रीमंतो धृतिमंतः स्मृतिमंतो मतिमंतो[9] गतिमंतः प्रज्ञारत्नमहरण्या पुण्यवंतो द्युतिमंतो व्यपगतखिला मलप्र-हीणाः स्मृतियुक्ताः शांतज्ञानालंभाः। ईदृशा आनंद तस्मिन्बुद्ध-

[1] कीर्तयः added in B after रत्नाकरा [2] श्रु° F [3] [illegible] F [illegible] [illegible] [4] [illegible] A [illegible] B [illegible] C [illegible] F [5] [illegible] A B [illegible] C F [6] धीरसत्त्वाः A B [illegible] C [illegible] F [7] [illegible] A B F [illegible] F. The whole of this sentence is [illegible] [8] [illegible] A C F [illegible] B [9] From जिन to शूरा left out in F [10] दृढा deest in F [11] [illegible] A B C [illegible] F [12] सहिता deest in C

क्षेत्रे सत्त्वाः संक्षिप्तेन च[1]। विस्तरेण पुनः सचेत्कल्पकोटीनियुतशतसहस्रस्थितिकेनाप्यायुष्प्रमाणेन तथागता निर्दिशेयुर्नैव शक्यं तेषां सत्पुरुषाणां गुणपर्यंतमधिगंतुं। न च तथागतस्य वैशारद्योपच्छेदो भवेत्। तत्कस्य हेतोः। उभयमप्येवानंदाचिंत्यमतुल्यं यदिदं तेषां बोधिसत्त्वानां गुणास्तथागतस्य चानुत्तरं[2] प्रज्ञाप्रतिभानं ॥३८॥[3]

अपि चानंद उत्तिष्ठ पश्चान्मुखीभूत्वा पुष्पावकीर्णांजलीं प्रगृह्य प्रणिपत[4]। एषा[5] सा दिग्यत्र स भगवानमिताभस्तथागतोऽर्हन्सम्यक्संबुद्धस्तिष्ठति ध्रियते यापयति धर्मं च देशयति विरजो विशुद्धं यस्य तन्नामधेयमनावरणे दशदिशि लोके विघुष्टमेकैकस्यां दिशि गंगानदीवालुकासमा बुद्धा भगवंतो वर्णयंति स्तुवंति प्रशंसंत्यसकृदसकृदसंगवाचाप्रतिवाक्याः ॥ [6]एवमुक्त आयुष्मानानंदो भगवंतमेतदवोचत्। इच्छाम्यहं भगवंस्तममिताभममितप्रभममितायुषं तथागतमर्हंतं सम्यक्संबुद्धं द्रष्टुं तांश्च बोधिसत्त्वान्महासत्त्वान्बहुबुद्धकोटीनियुतशतसहस्रावरोपितकुशलमूलान्। समनंतरभाषितायुष्मतानंदेनेयं वाक् अथ तावदेव सोऽमिताभस्तथागतोऽर्हन्सम्यक्संबुद्धः स्वपाणितलात्तथारूपं रश्मिं प्रामुंचद्यदिदं कोटीनियुतशतसहस्रतमं बुद्धक्षेत्रं महता-

[1] च B. । A. C. P. [2] [illegible] P. [3] Here the three earliest Chinese translations insert ten long sections, while the two later Chinese translations follow the Sanskrit text. [4] प्रणमत A. B. C. [illegible] P. [5] [illegible] A. B. C. [6] [illegible] A. B. [illegible] C. [illegible] P. [7] [illegible] A. B. C. [illegible] P. [8] [illegible] left out in P.

वभासेन स्फुटमभूत् ॥ तेन खलु पुनः[2] समयेन सर्वेच कोटीशतसहस्रबुद्धक्षेत्राणां ये केचित्कालपर्वता वा[3] रत्नपर्वता वा मेरुमहामेरुमुचिलिंदमहामुचिलिंदचक्रवाडमहाचक्रवाडा वा[4] चितयो[5] वा स्तंभा वा वृक्षगहनोद्यानविमानानि दिव्यमनुष्यकाणि तानि सर्वाणि तस्य[7] तथागतस्य तया प्रभयाभिनिर्भिन्नान्यभूवन्समभिभूतानि ॥ तद्यथापि नाम पुरुषो व्याममात्रकेऽन्वितो द्वितीयं पुरुषं प्रत्यवेक्षेतादादित्येऽभ्युद्गत एवमेवास्मिन्बुद्धक्षेत्रे भिक्षुभिक्षुण्युपासकोपासिकादेवनागयक्षराक्षसगंधर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्याश्च तस्यां वेलायामद्राक्षुस्तममिताभं तथागतमर्हंतं सम्यक्संबुद्धं सुमेरुमिव पर्वतराजं सर्वक्षेत्राभ्युद्गतं सर्वा दिशोऽभिभूय भासमानं तपंतं विरोचमानं विभ्राजमानं तं च महांतं बोधिसत्त्वगणं तं च भिक्षुसंघं यदिदं बुद्धानुभावेन तस्याः प्रभायाः परिशुद्धत्वात् ॥ तद्यथेयं महापृथिव्येकोदकजाता भवेत्तत्र न वृक्षा न पर्वता[11] न द्वीपा न तृणगुल्मौषधिवनस्पतयो न नदीश्वभ्रप्रपाताः प्रज्ञायेरन् अन्यत्रैकार्णवीभूता महापृथिव्येका स्यात् एवमेव तस्मिन्बुद्धक्षेत्रे नास्त्यन्यत्किंचिन्निमित्तं वा निमित्तं वान्यत्रैव व्यामप्रभाः श्रावकास्ते च योजनकोटीशतसहस्रप्रभा

[1] From वभासेन to रत्नपर्वता and महामेरु left out in P. [2] पुन A B पुनर् C [3] वा deest in C [4] वा deest in P [5] चितयो A C P चित्यो B [6] स्तम्भ deest in B [7] वा deest in A B C [8] दिव्य deest in C [9] द्वितीयं P [10] स्तम्भ deest in C P [11] From तो एकोदक to महापृथिवि left out in B [12] न deest in A B [13] पृथ्वी in all MSS [14] सर्व P सत्त्व A B C, read as सर्व? [15] वासी deest in P [16] कोटी P.

बोधिसत्त्वाः । स च भगवानमिताभस्तथागतोऽर्हन्सम्यक्संबुद्धस्तं च श्रावकगणं तं च[1] बोधिसत्त्वगणमभिभूय सर्वा दिशः प्रभासयन्संदृश्यते । तेन खल्वपि[2] समयेन तस्यां सुखावत्यां लोकधातौ बोधिसत्त्वाः श्रावकदेवमनुष्याश्च सर्वे त इमां सहालोकधातुं शाक्यमुनिं च तथागतमर्हंतं सम्यक्संबुद्धमर्हता भिक्षुसंघेन परिवृतं पश्यंति स्म धर्मं देशयंतं[3] ॥३९॥

तत्र खलु भगवानजितं बोधिसत्त्वं महासत्त्वमामंत्रयते स्म । पश्यसि त्वमजितामुष्मिन्बुद्धक्षेत्रे गुणालंकारव्यूहसंपदं । उपरिष्टाच्चांतरीक्ष[4] आरामरमणीयान्युद्यानरमणीयानि नदीपुष्करिणीरमणीयानि नानारत्नपद्मोत्पलकुमुदपुंडरीकाकीर्णानि । अधस्ताच्च धरणीतलमुपादाय यावदकनिष्ठभवनाङ्गणतलं[5] पुष्पाभिकीर्णं पुष्पावलिसमुपशोभितं[6] नानारत्नस्तंभपंक्तिपरिस्फुटं तथागताभिनिर्मितंनानाद्विजसंघनिषेवितं । अजितो बोधिसत्त्व[7] आह । पश्यामि भगवन् । भगवानाह । पश्यसि पुनस्त्वमजित[8] एतानमरान्द्विजसंघान्सर्वबुद्धक्षेत्रं बुद्धस्वरेणाभिविज्ञापयंतं येनैते [9]बोधिसत्त्वा नित्यमविरहिता बुद्धानुस्मृत्या । [10]अजित आह ।

[1] च B.   [2] सत्स A.C. सत्स्वं B. खल्वपि P.   [3] देशयंतिं P.   [4] क्षे A.B.C.; deest in P.   [5] रीरमणीया deest in P.   [6] तरं A.B.C   [7] पुष्पवलीसमुशोभितं A.B.C. पुष्पायतिसमुपशोभितं P.   [8] निंहित A B C. निर्मृतं P.   [9] अजितो बोधिसत्त्व deest in P.   [10] पश्यसि पुनस्त्वमजित deest in A. B C.   [11] एतानमरान्द्विजसंघा सर्वबुद्धक्षेत्रा बुद्धस्वराभिविज्ञापयन्तं A   एतानमरान्द्विजसंघान् सर्वबुद्धक्षेत्रान् बुद्धस्वरा° B   एतानमरानन्द्विजसंघां सर्वबुद्धक्षेत्रे बुद्धस्वरा° C.   एता अजितरमद्विजसंघां सर्वबुद्धक्षेत्र बुद्धस्वरनाभिज्ञापयन्तं P. It should be either संघं or विज्ञापयंतो येनेते.   [12] बो deest in A.   [13] नि महाराज instead of अजित आह P.

पश्यामि भगवन् । भगवानाह । पश्यसि पुनस्त्वमजितात्र बुद्धक्षेत्रेऽमूंस्तस्त्वान्योजनशतसहस्रिकेषु विमानेष्वभिरुह्यानंतरीक्षे सत्कारान्क्रामंतः[1] । अजित आह[2] । पश्यामि भगवन् । भगवानाह । तत्किं मन्यसेऽजित[3] अस्ति किंचिन्नानात्वं देवानां परनिर्मितवशवर्तिनां सुखावत्यां लोकधातौ मनुष्याणां वा । अजित[4] आह । एकमप्यहं भगवन्नानात्वं न समनुपश्यामि यावन्महर्द्धिका अत्र सुखावत्यां लोकधातौ मनुष्याः । भगवानाह । पश्यसि पुनस्त्वमजित तत्र सुखावत्यां लोकधातावेतेषां मनुष्याणामुदारेषु पद्मेषु[5] गर्भावासं[6] । आह । तद्यथापि नाम देवास्त्रायस्त्रिंशा देवा यामा वा[7] पंचाशद्योजनिकेषु वा योजनशतिकेषु वा पंचयोजनशतिकेषु वा विमानेषु प्रविष्टाः[8] क्रीडंति रमंति[9] परिचारयंति एवमेवाहं भगवन्नत्र[10] सुखावत्यां लोकधातावेतेषां मनुष्याणामुदारेषु पद्मेषु गर्भावासं[11] पश्यामि ॥४०॥

संति खलु पुनरत्र भगवन्सत्त्वा ये औपपादुकाः पद्मेषु पर्यंकैः प्रादुर्भवंति । तत्कोऽत्र भगवन्हेतुः कः प्रत्ययो[12] यदन्ये गर्भावासं प्रतिपद्यंते अन्ये पुनरौपपादुकाः पद्मेषु पर्यंकैः[13] प्रादुर्भवंति ।

[1] [illegible] A [illegible] B [illegible] C [illegible] P [2] [illegible] आह P [3] Deest in P [4] अजित deest in P [5] तु [illegible] A [illegible] B C P [6] गर्भावासं A, B गर्भावासे C P [7] देवा B [8] [illegible] A, B, C [illegible] P [9] रमंते P [10] अत्र deest in B [11] गर्भावासं A [illegible] B. From गर्भावासं to पद्मेषु left out in C. [12] [illegible] A, B [illegible] C [illegible] P [13] [illegible]

भगवानाह । ये तेऽजित बोधिसत्त्वा अन्येषु बुद्धक्षेत्रेषु स्थिताः[1] सुखावत्यां लोकधातावुपपत्तये [2]विचिकित्सामुत्पादयंति तेन चित्तेन कुशलमूलान्यवरोपयंति [3]तेषामच गर्भावासो भवति । ये पुनर्निर्विचिकित्सामुत्पाद्य च्छिन्नकांक्षाः सुखावत्यां लोकधातावुपपत्तये कुशलमूलान्यवरोपयंति बुद्धानां भगवतामसंगज्ञानमेवाकल्पयंत्यभिश्रद्दधत्यधिमुच्यंते त औपपादुकाः पद्मेषु पर्यंकैः प्रादुर्भवंति । ये तेऽजित बोधिसत्त्वा महासत्त्वा अन्यत्र बुद्धक्षेत्रेषु स्थिताश्चित्तमुत्पादयंत्यमिताभस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य दर्शनाय न विचिकित्सामुत्पादयंति न कांक्षंत्यसंगं बुद्धज्ञानं स्वकुशलमूलं चाभिश्रद्दधति तेषामौपपादुकानां पर्यंकैः [6]प्रादुर्भूतानां मुहूर्तमात्रेणैवंरूपः कायो भवति तद्यथान्येषां चिरोपपन्नानां सत्त्वानां ॥ पश्याजित प्रज्ञाविशेषं[7] प्रज्ञाविमात्र्यं प्रज्ञापरिहाणिं प्रज्ञापरीत्ततां यत्र हिताय पंच वर्षशतानि[8] परिहीणा भवंति बुद्धदर्शनाद्बोधिसत्त्वदर्शनाद्धर्मश्रवणाद्धर्मसंकथनात्कुशलमूलचर्यायाः परिहीणा भवंति सर्वकुशलमूलसंपत्तिभिः[9] । यदिदं विचिकित्सापतितैः संज्ञामनसिकारैः । तद्यथापि नामाजित राज्ञः क्षत्रियस्य मूर्धाभिषिक्तस्य बंधनागारं भवेत्सर्वसौवर्णवैडूर्य-

[1] [illegible] P [2] From विचिकित्सा to चित्तेन left out in C [3] From तेषां to कुशलमूलान्यवरोपयंति left out in C P [4] From अवरोपयंति to महासत्त्वा च left out in A B. [illegible] [5] [illegible] A. ज्ञानं [illegible] B C P [6] प्रादुर्भूतानां [illegible] A. [illegible] B [illegible] C [illegible] P [7] प्रज्ञाविशेषं A B प्रज्ञाविशेषं C. प्रज्ञाविशेषं P [8] From [illegible] to [illegible] left out in P [9] [illegible] A. [illegible] B [illegible] C

प्रत्युप्तमयमसकपट्टमाल्यदामकलापं[1] नानारंगविभववितानं दूष्य-
पट्टसंच्छन्नं[2] नानापुष्पकुसुमाभिकीर्णमुदारधूपनिर्धूपितं प्रासा-
दहर्म्यनिर्यूह[3]गवाक्षवेदिकातोरणविचित्रं सप्तरत्न[4]किंकिणीजाल-
संच्छन्नं चतुरस्रं चतुःस्थूणं[5] चतुर्द्वारं चतुःसोपानं। तत्र तस्य स
राज्ञः पुत्रः केनचिदेव कृत्येन प्रक्षिप्य जांबूनदसुवर्णमयैर्निगडैर्बद्धो
भवति। तस्य च तत्र [6]पर्यंकः प्रज्ञप्तः स्यादनेकगोनिकास्तीर्ण-
तूलिकापर्णकास्तीर्णः कालिंगप्रावरणप्रत्यास्तरणःसोत्तरपदच्छद
उभयांतलोहितोपधानश्चित्रो दर्शनीयः। स तत्र तदाभिपर्णो
वाभिसंपन्नो वा भवेत्। बहु चास्यानेकविधं शुचि विनीतं
पानभोजनं तत्रोपनाम्येत। तत्किं मन्यसेऽजितोदारस्तस्य राज-
पुत्रस्य स परिभोगो भवेत्। अजित[8] आह। उदारो भगवन्।
भगवानाह। तत्किं मन्यसेऽजितापि त्वास्वादयेत्तत्र निशामयेच्च[9]
तेन वा तुष्टिं विद्यात्। आह। नो हीदं भगवन् अपि तु[10] खलु
पुनर्मैद्यपनीत्य[11] राज्ञा तत्र बंधनागारे प्रक्षिप्तो भवेत्स ततो
मोक्षमेवाकांक्षेत्। अभिजातान्कुमारानमात्यान्स्त्र्यागारां[12]श्रेष्ठिनो

[1] स्तबकमयसक A B. स्तबकमयपट्ट C. Cf. Lal. Vist. p. 196, l. 10, बद्धशुक्तपट्टमाल्यदामक-लापे, also Burnouf, Lotus, p. 369. [2] पुष्पपट्टसंस्कार्य A C. पुष्पपट्टसंस्कार्य B. पत्रकांस्कार्य P. [3] निर्वूह P. [4] After सप्तरत्न, P. adds प्रतिमण्डितं ॥ हेमपद्म. [5] चतुःस्थूलं A. चतुःस्थूलं B. चतुःस्थूणं C. चतुःस्थूणं P. [6] From पर्यंक to स्त्र left out in B. [7] तैन P. [8] अजित deest in P. [9] निशामयेच A. C. P. निशमेयच B. [10] तु deest in C P. [11] पुनर्वैत्स्यपनीय A. पुनर्वैत्स्यपनीय B. पुनर्वैत्स्यपनीते C. पुनर्वैत्स्यपरीते P. [12] रोमशालादंशा A. रोमशालाद्वा B. रोमशा-लादंशा C. रोमशालास्थागारे P.

गृह्णीन्कोट्टराजांश्च पर्येषयेयु एनं ततो बंधनागारात्परिमोच-
येयुः। किंचापि भगवंस्तस्य राजकुमारस्य तत्र बंधनागारे नाभि-
रतिर्भवेत्र परिमुच्यते यावच्च राजा प्रसादमुपदर्शयति। भगवानाह।
एवमेवाजित ये ते बोधिसत्त्वा विचिकित्सापतिताः कुशलमू-
[illegible] कांक्षंति बुद्धज्ञानं किंचापि तेन बुद्धनामश्रवणेन
[illegible] निश्चप्रसादमात्रेणैव सुखावत्यां लोकधातावुपपद्यंते न
तु [illegible] पद्मेषु पर्यंकैः प्रादुर्भवंति अपि तु पद्मेषु
[illegible]। किंचापि तेषां तत्रोद्यानविमानसंज्ञाः
[illegible]। [illegible] नास्ति [illegible] न प्रतिकूलं
[illegible]। अपि तु खलु पुनः पंच वर्षशतानि विरहिता
[illegible] बोधिसत्त्वदर्शनेन धर्मसांकथ्य-
[illegible] धर्मपर्येषणा। किंचापि ते तत्र
[illegible] विहरंति। अपि तु खलु पुनः पूर्व-
[illegible] समनुपश्यंति। न तेषां ततो

[illegible]

निष्क्रामतां[1] निष्क्रमः प्रज्ञायत[2] ऊर्द्धमधस्तिर्यग्वा। पश्याजित एतर्हि नाम पंचभिर्वर्णशतैर्बहूनि बुद्धकोटीनियुतशतसहस्रोपस्थानानि स्तुवंत्यपरिमाणासंख्येयाप्रमेयाणि च कुशलमूलान्यवरोपयितव्यानि[3]। तत्रपि[4] विचिकित्सादोषेण विनाशयंति। पश्याजित कियन्महतेऽनर्थाय[5] बोधिसत्त्वानां विचिकित्सा[6] संवर्तत इति। तस्मात्तर्ह्यजित बोधिसत्त्वैर्निर्विचिकित्सैर्बोधये चित्तमुत्पाद्य द्यर्थं सर्वसत्त्वहितसुखाधानाय सामर्थ्यप्रतिलंभार्थं सुखावत्यां लोकधातावुपपत्तये कुशलमूलानि परिणामयितव्यानि यत्र भगवानमिताभस्तथागतोऽर्हन्सम्यक्संबुद्धः ॥४१॥

एवमुक्तेऽजितो बोधिसत्त्वो भगवंतमेतदवोचत्। किं पुनर्भगवन्बोधिसत्त्वा इतो बुद्धक्षेत्रात्परिनिष्पन्ना अन्येषां वा[10] बुद्धानां भगवतामंतिकात्सुखावत्यां लोकधातावुत्पत्स्यंते। भगवानाह। इतो ऽजित बुद्धक्षेत्राद्द्वासप्ततिकोटीनियुतानि बोधिसत्त्वानां परिनिष्पन्नानि यानि सुखावत्यां लोकधातावुपपत्स्यंते परिनिष्पन्नानामवैवर्तिकानां बहुबुद्धकोटीनियुतशतसहस्राण्यवरोपितैः कुशलमूलैः कः पुनर्वादस्ततः परीत्ततरैः कुशलमूलैः।

[1] निष्क्रामतां deest in B. [2] प्रज्ञायते। A. B. प्रज्ञायेते। C. प्रज्ञायते: P. [3] छायुष A. B. C. छाय्युष P. [4] मो deest in A. C. P. [5] प्रज्ञाः in all MSS. [6] भवे in all MSS. [7] कियन्महते भर्थाय A. कियन्महते भार्थाय B. कियन्महत नर्थाय C. p. कियन्महते मत्थाय P. [8] सर्वं C. [9] सामर्थ्ये A. C. P. सामर्थ्यं प्र B. [10] वा deest in B. [11] नि P. न A. B. C. The MSS constantly vary between नयुत and नियुत, after कोटी or कोटि. I have preferred नियुत and कोटी throughout this text.

१दुष्प्रसहस्य[1] तथागतस्यांतिकादष्टादशकोटीनियुतगतानि बोधिसत्त्वानां सुखावत्यां लोकधातावुपपत्स्यंते । पूर्वोत्तरे दिग्भागे २रत्नाकरो नाम तथागतो विहरति । तस्यांतिकान्नवतिबोधिसत्त्वकोट्यः सुखावत्यां लोकधातावुपपत्स्यंते । ३ज्योतिष्प्रभस्य तथागतस्यांतिकाद्द्वाविंशतिबोधिसत्त्वकोट्यः सुखावत्यां लोकधातावुपपत्स्यंते । ४अमितप्रभस्य तथागतस्यांतिकात्पंचविंशतिबोधिसत्त्वकोट्यः सुखावत्यां लोकधातावुपपत्स्यंते । ५लोकप्रदीपस्य तथागतस्यांतिकात्पष्टिबोधिसत्त्वकोट्यः सुखावत्यां लोकधातावुपपत्स्यंते । ६नागाभिभुवस्तथागतस्यांतिकाच्चतुःषष्टिबोधिसत्त्वकोट्यः सुखावत्यां लोकधातावुपपत्स्यंते । ७विरजःप्रभस्य तथागतस्यांतिकात्पंचविंशतिबोधिसत्त्वकोट्यः सुखावत्यां लोकधातावुपपत्स्यंते । ८सिंहस्य[2] तथागतस्यांतिकात्षोडशबोधिसत्त्वकोट्यः सुखावत्यां लोकधातावुपपत्स्यंते । ९सिंहस्य तथागतस्यांतिकादष्टादशबोधिसत्त्वसहस्राणि[3] सुखावत्यां लोकधातावुपपत्स्यंते । १०श्रीकूटस्य तथागतस्यांतिकादेकाशीतिबोधिसत्त्वकोटीनियुतानि सुखावत्यां लोकधातावुपपत्स्यंते । ११नरेंद्रराजस्य तथागतस्यांतिकाद्दशबोधिसत्त्वकोटीनियुतानि सुखावत्यां लोकधातावुपपत्स्यंते । १२बलाभिज्ञस्य तथागतस्यांतिकाद्द्वादशबोधिसत्त्वसहस्राणि सुखावत्यां लोकधातावुपपत्स्यंते । १३पुष्पध्वजस्य

[1] दुष्प्रसहस्या A. °स्य B C. दुष्प्रसहस्य P. [2] सिंहस्य deest in P [3] बोधिसत्त्वकोट्यः सहस्राणि B, probably बोधिसत्त्वकोट्यः or बोधिसत्त्वकोटीनियुतसहस्राणि ।
[4] Probably कोटी is left out; from सहस्राणि to पौर्वेमात्रा बोधिसत्त्व left out in P

तथागतस्यांतिकात्पंचविंशतिवीर्यप्राप्ता बोधिसत्त्वकोट्य एकप्रस्थानप्रस्थिता एकेनाष्टाहेन नयतिकल्पकोटीनियुतशतसहस्राणि पश्चान्मुखीकृत्य[1] सुखावत्यां लोकधातावुपपत्स्यंते । १४ज्वलनां- [illegible]

सप्ततिबोधिसत्त्वकोट्यः सुखावत्यां लोकधातावुपपत्स्यंतेऽमिताभस्य तथागतस्य दर्शनाय वंदनाय पर्युपासनाय परिपृच्छनाय परिप्रश्नीकरणाय। एतेनाजित पर्यायेण परिपूर्णकल्पकोटीनियुतं[2] नामधेयानि परिकीर्तयेयं तेषां तथागतानां येभ्यस्ते बोधिसत्त्वा[3] उपसंक्रामंति सुखावत्यां लोकधातौ तममिताभं तथागतं द्रष्टुं वंदितुं पर्युपासितुं न शक्यं पर्यंतोऽधिगंतुं ॥४२॥

पश्याजित कियत्सुलब्धलाभास्ते सत्त्वा येऽमिताभस्य तथागतस्यार्हतः सम्यक्संबुद्धस्य नामधेयं श्रोष्यंति नापि ते सत्त्वा हीनाधिमुक्तिका भविष्यंति येऽंतश एकचित्तप्रसादमपि तस्मिंस्तथागतेऽभिलप्स्यंत अस्मिंश्च धर्मपर्याये । तस्मात्तर्ह्यजित आरोचयामि वः प्रतिवेदयामि सदेवकस्य लोकस्य पुरतोऽस्य धर्मपर्यायस्य श्रावणाय। त्रिसाहस्रमहासाहस्रमपि लोकधातुमग्नि-

[1] एकाष्टाहे भयनपति A. एकाष्टाहे भयनति B. एकेनाष्टाहे भयनपति C. एकेनाष्टाहे भयति P. [2] पश्चान्मुखीकृत्य येन A. B. पश्चान्मुखीकृत्य येन C. पश्चा मुखीकृत्य वा: P. [3] ज्वलना A. B. C. ज्वलना P. [4] पदि decst in A. B. [5] भयुत in all MSS. [6] यस्यते बोधिसत्त्वा A. यस्ते° B. यस्यते बोधिसत्त्वा C. यस्तेभ्ये बोधिसत्त्वा: P. [7] दा deest in A. B. C. [8] P. adds परि after परिन.

पूर्णमवगाह्यातिक्रमेकचित्तोत्पादमपि प्रतिसारो न कर्तव्यः। तत्कस्य हेतोः। बोधिसत्त्वकोट्यो ह्यजिताश्रवणादेषामेवंरूपाणां धर्मपर्यायाणां विवर्तन्तेऽनुत्तरायाः सम्यक्संबोधेः। तस्मादस्य धर्मपर्यायस्याध्याशयेन श्रवणोद्ग्रहणधारणार्थं मर्यावाप्तये विस्तरेण संप्रकाशाय[2] भावनार्थं च सुमहद्वीर्यमारब्धव्यं[3]। अंतश एकरात्रिं दिनमपेक्षगोदोहमात्रमपंतशः पुस्तकावरोपितं कृत्वा[4] सुलिखितो धारयितव्यः। शास्तृसंज्ञा च तत्रोपाध्याये[5] 'कर्तव्ये-च्छति[6] क्षिप्रमपरिमितान्सत्त्वानविवर्तिकत्वेऽनुत्तरायाः सम्यक्संबोधेः प्रतिष्ठापयितुं तच्च[7] तस्य भगवतोऽमिताभस्य तथागतस्य बुद्धक्षेत्रं [9]द्रष्टुमात्मनश्च विशिष्टां बुद्धक्षेत्रगुणालंकारव्यूहसंपदं परिग्रहीतुमिति॥ अपि तु खल्वजितात्यर्थं सुलब्धलाभास्ते सत्त्वा अवरोपितकुशलमूलाः पूर्वजिनकृताधिकारा बुद्धाधिष्ठिताश्च भविष्यंति येषामनागतेऽध्वनि यावत्सद्धर्मविप्रलोपे[10] वर्तमान इम एवंरूपा[11] उदारा[12] धर्मपर्यायाः सर्वबुद्धसंवर्णिताः सर्वबुद्धप्रशस्ताः सर्वबुद्धानुज्ञाता महतः[13] सर्वज्ञज्ञानस्य क्षिप्रमाहा-

[1] क्रचित्तो A. C क्रमचित्तो B. क्रमैकचित्तो P. [2] संप्रकाशाये in all MSS., probably संप्रकाशनाय, as in p [3] सुमहद्वीयमारब्धंव्यं। A. सुमहद्वीर्यमालब्धव्यं। B °रब्धव्यं। C. सुमहद्वीर्यमारब्धव्य P. [4] ता कृत्वा A C. तां कृत्वा B. त अपि कृत्वा P. [5] कर्तव्या deest in P [6] इच्छद्भिः A. B. C. इच्छति P., may be meant for a locative referring *to उपाध्याये, or for य इच्छति.* [7] च *deest in C.* [8] ते च *A. B.* तेन च C. तं च P. [9] द्रष्टुं P. [10] विप्रलापे A. विप्रलपे B विप्रलाप C. विप्रलाप्प P. But cf. Vagrakkhedikâ, p. 30, l. 14. भविष्यत्यनागतेऽध्वनि °सद्धर्मविप्रलोपे वर्तमाने. [11] इममेवरूपा A. B. C. °पाः P. [12] रा deest in C [13] तामहंतः A. C. ताः॥ महंतः B तां P., leaving महतः.

रक्षाः श्रोत्रावभासमागमिष्यंति ये श्रुत्वा चोदारमीतिप्रामोद्यं प्रतिलप्स्यंते उद्ग्रहीष्यंति धारयिष्यंति वाचयिष्यंति पर्यवाप्स्यंति परेभ्यो विस्तरेण संप्रकाशयिष्यंति भावनाभिरताश्च भविष्यंत्यंततो लिखित्वा पूजयिष्यंति बहु च ते पुण्यं प्रसविष्यंति यस्य न सुकरा संख्या कर्तुं ॥ इति ह्यजित तथागतेन कर्तव्यं कृतं मया। युष्माभिरिदानीं निर्विचिकित्सैर्योगः करणीयः। मा संशयता-संगमनावरणे बुद्धज्ञानं मा भूत्सर्वाकारवरोपेतरत्नमये बंध-नागारे प्रवेशः। दुर्लभो ह्यजित बुद्धोत्पादो दुर्लभा धर्मदेशना दुर्लभा क्षणसंपत्। आख्याता चाजित मया सर्वकुशलमूलपार-मिताप्राप्तिः। यूयमिदानीमभियुज्यत प्रतिपद्यध्वं। इदं खलु पुनरजित धर्मपर्यायस्य महतीं परींदनां करोमि। अविप्रणाशाय बुद्धधर्माणामनंतर्धानाय पराक्रमिष्यध्व मा तथागताज्ञां क्षोभ-यिष्यथ ॥४३॥

अथ खलु पुनर्भगवांस्तस्यां वेलायामिमा गाथा अभाषत।

न मे ह्यकृतपुण्यानां श्रवा भेष्यंति ईदृशाः।
ये तु ते शूर सिद्धार्थाः श्रोष्यंति च इमां गिरं ॥१॥

[illegible] A B C [illegible] P. [illegible] A B C [illegible] P. [illegible]
[illegible] B [illegible] C [illegible] P. [illegible] A [illegible] B [illegible]
[illegible] P. [illegible] A B C [illegible] [illegible] A B C [illegible] C
[illegible] A B C [illegible] P. [illegible] B [illegible] A C [illegible]
[illegible] B [illegible] P. [illegible] [illegible] A B
[illegible] C P. [illegible] A B [illegible] [illegible] A B
[illegible] P.

पूर्णमवगाह्यातिक्रमेकचित्तोत्पादमपि प्रतिसारी न कर्तव्यः । तत्कस्य हेतोः । बोधिसत्त्वकोट्यो ह्यजिताश्रवणादेषामेवंरूपाणां धर्मपर्यायाणां विवर्तन्तेऽनुत्तरायाः सम्यक्संबोधेः । तस्मादस्य धर्मपर्यायस्याध्याशयेन श्रवणोद्ग्रहणधारणार्थं पर्यावाप्तये विस्तरेण संप्रकाशाय[2] भावनार्थं च सुमहद्वीर्यमारब्धव्यं[3] । अंततः एकरात्रिं दिनमप्येकगोदोहमात्रमप्यंततः पुस्तकावरोपितं कृत्वा[4] सुलिखितो धारयितव्यः । शास्तृसंज्ञा च तत्रोपाध्याये [5]कर्तव्येच्छति[6] क्षिप्रमपरिमितान्सत्त्वानविवर्तिकत्वेऽनुत्तरायाः सम्यक्संबोधेः प्रतिष्ठापयितुं तच्च[7] तस्य भगवतोऽमिताभस्य तथागतस्य बुद्धक्षेत्रं [8]द्रष्टुमात्मनश्च विशिष्टां बुद्धक्षेत्रगुणालंकारव्यूहसंपदं परिग्रहीतुमिति ॥ अपि तु खल्वजितात्यर्थं सुलब्धलाभास्ते सत्त्वा अवरोपितकुशलमूलाः पूर्वजिनकृताधिकारा बुद्धाधिष्ठिताश्च भविष्यंति येषामनागतेऽध्वनि यावत्सद्धर्मविप्रलोपे[10] वर्तमान इम एवंरूपा[11] उदारा[12] धर्मपर्यायाः सर्वबुद्धसंवर्णिताः सर्वबुद्धप्रशस्ताः सर्वबुद्धानुज्ञाता महतः[13] सर्वज्ञज्ञानस्य क्षिप्रमाहा-

[1] क्रचित्तो A. C. क्रमचित्तो B. क्रमैकचित्तो P. [2] संप्रकाशये in all MSS., probably संप्रकाशनाय, as in p [3] सुमहद्वीयमारब्धंयं । A. सुमहद्वीर्यमालभ्यं । B °रभ्यं । C. सुमहद्वीयमारद्धव्य P. [4] ता कृत्वा A. C. तां कृत्वा B. न चापि कृत्वा P. [5] कर्तव्या deest in P [6] इच्छद्भिः A. B. C. इच्छति P., may be meant for a locative referring to उपाध्याये, or for य इच्छति. [7] क deest in C. [8] ते च A B. तेन च C तं च P. [9] द्रष्टुं P [10] विप्रलापे A. निप्रत्यपे B. विप्रलाप C. विप्रलाप्य P. But cf. Vajrakkhedikâ, p. 30, l. 14: भविष्यंत्यनागतेऽध्वनि °सद्धर्मविप्रलोपे वर्तमाने. [11] इममेवरूपा A. B. C. °पाः P. [12] रा deest in C. [13] तामर्हतः A. C. ताः ॥ सर्हतः B. ता P., leaving महतः.

क्षयांतरे निर्वृत ते भवेयुः।
प्रकाशमाना बहुकल्पकोटीः।
न च बुद्धज्ञानस्य प्रमाणु लभ्यते।
तथा हि ज्ञानार्थयं[1] जिनानां ॥७॥
तस्माद्वरः पंडित विज्ञजातियः[2]।
यो मह्य वाक्यमभिश्रद्धेय[3]।
कृत्स्नां स[4] साक्षाज्जिनज्ञानमार्गान्[5]।
बुद्धः[6] प्रजानं ति[7] गिरामुदीरयेत् ॥८॥
कदाचि लभ्यति मनुष्यलाभः।
कदाचि [8]बुद्धान पि प्रादुर्भावः।
श्रद्धार्थप्रज्ञा सुचिरेण लभ्यते।
तस्यार्थप्राप्ति जनयेत[9] वीर्यं ॥९॥
य[10] ईदृशां[11] धर्म श्रुणित्व श्रेष्ठां।
लभ्यंति प्रीतिं सुगत स्मरंतः।
ते मित्रमस्माकमतीतमध्वनि।
ये चापि बोधाय[12] जनंति छंदमिति ॥१०॥४४॥

अस्मिन्खलु पुनर्धर्मपर्याये भाष्यमाणे द्वादशानां सत्त्वनियु-

[1] ज्ञानार्थयं A. ज्ञानात्मार्थयं B. ज्ञानार्थयं C. ज्ञानाय P. Scan ⏑–⏑––⏑⏑–⏑––. [2] स B. [3] य A. B. यः C. P. [4] यु A. C. युः B. यः P. [5] –त्स्नां स A. –त्स्नाय C. –त्स्नोर्मा स B. कृत्स्नाय P. [6] सादि जिन P. [7] मार्गान् A. B. मार्गो स C. दर्शि स P. [8] बुद्धः A. B. C. बुद्ध P. [9] जानंति A. C. जानंति B. जाति P. [10] स A. B. स्म C. र P. मेत? [11] दु A. C. [12] यति P. [13] ये B. [14] शा P. [15] ये बोधाय A. C. ये चापि बोधाये B. ये बुद्धायाय P.

दृष्टो येष्व हि संबुद्धो लोकनाथ प्रभंकरः।
सगौरवैः श्रुतो धर्मः प्रीतिं प्राप्स्यंति ते परां॥२॥
न शक्त हीनेहि कुसीद[1]दृष्टिभिः।
वुद्धान[2] धर्मेषु प्रसाद विंदितुं[3]।
ये वुद्धक्षेत्रेषु[4] अकार्षि पूजां।
त्रैलोक्यनाथान[6] चर्यासु शिक्षिषु॥३॥
यथांधकारे पुरुषो ह्यचक्षुः।
मार्गं न[7] जाने कुतु संप्रकाशयेत्।
सर्वे तथा श्रावक वुद्धज्ञाने।
अजानकाः किं पुनरद्य सत्त्वाः॥४॥
वुद्धो[9] हि वुद्धस्य गुणां प्रजानते।
न देवनागासुरयक्षश्रावकाः।
अनेकवुद्धान पि नो गती[10] यथो।
वुद्धस्य ज्ञाने हि प्रकाश्यमाने॥५॥
यदि सर्वसत्त्वाः समता[11] भवेयुः।
विशुद्धज्ञाने[12] परमार्थकोविदाः।
ते कल्पकोटीरथ वापि उत्तरे।
नैकस्य वुद्धस्य गुणान्कथयेयुः॥६॥

[1] शीद् A. B. C सिदं P. [2] वुद्धे A C. वुद्ध B वुद्धा P [3] विविंदु P
[4] वुद्धपुत्रेषु A. C. वुद्धेषु B. वुद्धपुत्रे P. [5] त्रैलो A. त्रैधा B त्रै लो C. त्र लो P.
[6] नाथान् B. P. नाथान C [7] तु P. [8] सु संप्र P [9] From वुद्धो to सर्वसत्त्वाः
left out in P. [10] ना गतौ B. [11] समेता P [12] न P नाद, see chap 25

प्राकंपत् । विविधानि च प्रातिहार्याणि संदृश्यंते स्म । पृथिव्यां संस्कृतमभूत् दिव्यमानुष्यकानि च तूर्याणि संप्रवादितान्यभूवन् । अनुमोदनाशब्देन च यावदकनिष्ठभवनं विज्ञप्तमभूत् ॥४६॥

इदमवोचद्भगवानात्तमना अजितो बोधिसत्त्वो महासत्त्व आयुष्मांश्चानंदः सा च सर्वावती पर्षत्सदेवमानुषासुरगरुडगंधर्वश्च लोको भगवतो भाषितमभ्यनंदन्निति ॥४७॥

[1]भगवतोऽमिताभस्य तथागतस्य सुखावतीगुणवर्णपरि-

[1] From here the text is given from A.; the various readings will be seen below:

A भगवतोऽमिताभस्य तथागतस्य सुखावतीगुणवर्णपरिकीर्तन बोधिसत्त्वानामवैवर्त्यभूमिप्रवेशः॥
B श्रीभगवतोऽमिताभस्य तथागतस्य सुखावतीगुणवर्णपरिकीर्तन बोधिसत्त्वानामवैवर्त्यभूमिप्रवेशः॥
C. भगवतोऽमिताभस्य तथागतस्य गुण परिकीर्तनं बोधिसत्त्वानामवैवर्त्यभूमिप्रवेशः॥
P. भगवतो मिताभस्य तथागतस्य गुन परिकीर्तनं बोधिसत्त्वानामवैवर्त्यभूमिप्रवेश॥

A अमिताभस्य परिवर्तः सुखावतीव्यूह
B अमिताभस्य परिवर्तः सुखावतीव्यूह
C. अमिताभस्य परिवर्तः सुखावतीव्यूहः संपूर्णः॥ ॥ इति श्रीमदमिताभस्य तथागतस्य सुखा-
P. अमिताभस्य व्यूहपरिवर्तः सुखावतीव्यूह. संपूर्णा॥ ॥ इति श्री अमिताभस्य सुखा-

A महायानसूत्रं समाप्तं॥ ये धर्मा हेतुप्रभवा हेतुं तेषां तथागतः।
B. महायानसूत्रं समाप्तं॥ ये धर्मा हेतुप्रभवा हेतु तेषां तथागतः।
C. वतीव्यूह महायानसूत्रं समाप्तं.॥ ॥ शुभम्॥
P. वतीव्यूह नाम महायानसूत्रं समाप्तं॥

A. ह्यवदत्तेषां च यो निरोध एवं वादि महाश्रमणः॥ ॥ संवत् ८३४ कार्त्तिकशुदि ॥
B. ह्यवद तेषां च यो निरोध एवं वादि महाश्रमणः॥ ६८० ।
C.
P. संवत् ८५५ मिति चैत्र शुक्ल ६ हु

तकोटीनां विरजो विगतमलं धर्मेषु[1] धर्मचक्षुर्विशुद्धं । चतुर्विंशत्या कोटीनियुतशतफलं[2] प्राप्तं[3]। अष्टानां भिक्षुशतानामनुपादायाश्रवेभ्यश्चित्तानि विमुक्तानि। पंचविंशत्या बोधिसत्त्वकोटीभिरनुत्पत्तिकधर्मक्षांतिः प्रतिलब्धा । देवमानुषिकायाश्च प्रजायाश्चत्वारिंशत्कोटीनियुतशतसहस्राणामनुत्पन्नपूर्वाण्यनुत्तरायां सम्यक्संबोधौ चित्तान्युत्पन्नानि सुखावत्यां [4]लोकधातावुपपत्तये च कुशलमूलान्यवरोपितानि भगवतोऽमिताभस्य तथागतस्य [5]दर्शनकामतया। सर्वे च ते तत्रोपपद्यानुपूर्वेण[6] मंजुस्वरा नाम तथागता अन्येषु लोकधातुषूपपत्स्यंते । अशीतिश्च नियुतकोट्यो दीपंकरे तथागते[7] लब्धक्षांतिका अविवर्तिका अनुत्तरायाः[8] सम्यक्संबोधेरमितायुषैव[9] तथागतेन[10] परिपाचिताः[11] पूर्वबोधिसत्त्वचर्यां चरंतस्ताश्च[12] सुखावत्यां लोकधातावुपपद्य पूर्वप्रणिधानचर्याः परिपूरयिष्यंति ॥४५॥

तस्यां वेलायामयं त्रिसाहस्रमहासाहस्रो लोकधातुः[13] षड्विकारं

[1] [illegible] in P [2] फ B [3] प्राप्त and प्तं left out in P [4] The passage seems to be corrupt and, according to the first Chinese translations, we expect [illegible] प्राप्त। The number of [illegible] in the five [illegible] koṭis, [illegible] koṭis, [illegible] koṭis and [illegible] nayutas respectively, but [illegible]. [5] [illegible] in P [6] [illegible] in P [7] [illegible] A C [illegible] B [illegible] [8] [illegible] A [illegible] B [illegible] C P [9] [illegible] A B [illegible] C [illegible] P [10] [illegible] [11] [illegible] [12] [illegible] [13] [illegible]

APPENDIX I.

SANGHAVARMAN'S CHINESE VERSION OF THE FOUR GÂTHÂS IN THE SUKHÂVATÎVYÛHA (CHAPTERS 4, 9, 31, 41), WITH A LITERAL TRANSLATION

1. SANSKRIT TEXT, Chapter 4, pages 7–9

1. O thou of eminent and bright countenance, whose power is endless, such a brightness as this is incomparable (in the world)! The brightness of the sun, moon, jewels, and pearls is all to be covered (as it were) just as a heap of black powder*.

2. The form of the Tathâgata is without an equal in the world, and the great voice of the fully-enlightened one reverberates in the ten quarters. His virtue, knowledge, strength, meditation, wisdom, power, and good qualities are matchless, most excellent and rare.

光[1]顔巍巍 威神無極 如是焔明 無與等者
日月摩尼 珠光焔耀 皆悉隱蔽 猶若聚墨
如[2]來容顔 超世無倫 正覺大音 響流十方
戒聞精進 三昧智慧 威德無侶 殊勝希有

* 'Black powder' looks as if the Chinese translator had read mash, or masi for bhosi; see Vagrakkhedikâ, p. 44, l. 14.

कीर्तनं¹ बोधिसत्त्वानामवैवर्त्यभूमिप्रवेशः। अमिताभस्य परिवर्तः सुखावतीव्यूहमहायानसूत्रं समाप्तं ॥

ये धर्मा हेतुप्रभावा हेतुं तेषां तथागतः।
ह्यवदत्तेषां च यो निरोध एवं वादि महाश्रमणः ॥

A. संपूर्णमभूत् ॥ श्रीसुवर्णपनारिमहानगरे मैत्रीपुरिमहाविहारे श्रीशाक्यवंशदासवज्राचार्येण
B
C.
P समैत्रिपुरमहाविहारया श्री वज्राचार्ये रा-

A. सद्धर्मसूत्रस्य च लेखितं मेदंः ॥ ॥ संसारमोक्षहेतो स्वपापमुक्तये स्वेनैव लिखितं शुभं ॥
B.
C.
P सर्वे लुंठित यो वस्तुको शुभं ॥

¹ न A ² न A.

6. There may be a hundred thousands of millions of Buddhas—immeasurably great sages, whose number is as that of the sand of the Gaṅgâ To worship all these Buddhas does not equal the seeking for the way firmly and rightly without returning.

7. There are the worlds of the Buddhas like the sand of the Gaṅgâ. These (Buddha-)countries are innumerable and countless. My light will shine over all these countries, thus my strength and power will be immeasurable.

8. May my country be the best (of all), when I become a Buddha, and the people therein excellent, and the Bodhi-maṇḍala surpassing others. May my country be just as (the state of) Nirvâṇa, and without equal. I will pity and deliver all (beings).

9. May those who come to be born there from the ten quarters be pure and joyful, happy and at ease, when they arrive in my country. May

假使有佛 百千億萬 無量大聖 數如恒沙 供養一切 斯等諸佛 不如求道
堅正不却 譬如恒沙 諸佛世界 復不可計 無數刹土 光明悉照 徧此諸國
如是精進 威神難量 令我作佛 國土第一 其衆奇妙 道場超絕 國如泥洹
而無等雙 我當哀愍 度脫一切 十方來生 心悅清淨 已到我國 快樂安穩

3. Deeply and clearly, well and intensely, he thinks of the law of the Buddhas, (incomprehensible) like the sea, and understands its depth and greatest profoundness, and reaches its bottom. Bhagavat (i. e. honoured by the world) is ever free from ignorance, covetousness, and anger. O Hero, like a lion, whose spiritual virtue is immeasurable!

4. His merit is great and wide, his wisdom is deep and wonderful, and his light and powerful form cause the universe to be shaken*. May I become a Buddha just as the holy King of the law, and deliver all beings from birth and death!

5. In generosity, equanimity, virtue, endurance, strength, also in meditation and wisdom, I shall become the best. Promising perfectly these vows I shall become a Buddha, the great helper of all those who have fear and anxiety.

深[3]諦善念 諸佛法海 窮深盡奧 究其涯底 無明欲怒 世尊永無

人雄師子 神德無量 功[4]勳廣大 智慧深妙 光明威相 震動大千

願我作佛 齊聖法王 過度生死 靡不解脫 布[5]施調意 戒忍精進

如是三昧 智慧爲上 吾誓得佛 普行此願 一切恐懼 爲作大安

* This would point to great [illegible]

3. If my name should not be heard all over the ten quarters, when I attain to the path of Buddha, may I not accomplish the perfect knowledge.

我至成佛道 名聲超十方 究竟靡所聞 誓不成正覺

4. May I become the teacher of gods and men, having sought for the highest path, by generosity, deep and right meditation, pure wisdom and practising the pure practice (Brahma-*karyâ*)*.

離欲深正念 淨慧修梵行 志求無上道 爲諸天人師

5. The great light produced by the spiritual power (of the Tathâgata) shines over unlimited countries, and destroys the darkness of three (kinds of) defilements, and saves all beings from misfortune.

神力演大光 普照無際土 消除三垢冥 廣濟衆厄難

6. Opening his eye of wisdom, he (the Tathâgata) destroys that darkness of ignorance like a blind man. Shutting up all the evil paths, he opens the gate of the good state.

開彼智慧眼 滅此昏盲闇 閉塞諸惡道 通達善趣門

* Bodhiruki translates this verse as follows: 'If I should still seek for the object of desire, after I left home in order to advance towards the highest path, and should not practise meditation and wisdom, may I not become the charioteer (of men whose passions are to be tamed) and the teacher of gods and men.'

Buddha witness that this is my true realisation! I make prayer for that desire, full of strength and vigour.

10. May those Bhagavats of the ten quarters, whose wisdom is unimpeded, know always my thought and practice! Even if I abide in the midst of poisons and pains, I shall always practise strength (vîrya) and endurance (kshânti), and be free from regret.

幸佛信明　是我眞證　發願於彼
力精所欲　[10]十方世尊　智慧無礙
常令此尊　知我心行　假令身止
諸苦毒中　我行精進　忍終不悔

2 SANSKRIT TEXT, Chapter 9, pages 22-24

1. If these prayers, surpassing the world, which I have made and by which I should certainly attain to the highest path, should not be fulfilled, may I not accomplish the perfect knowledge.

2. If I should not become a great giver, so as to save all the poor, for immeasurable kalpas, may I not accomplish the perfect knowledge.

[1]我建超世願　必至無上道
斯願不滿足　誓不成正覺
[2]我於無量劫　不爲大施主
普濟諸貧苦　誓不成正覺

3. If my name should not be heard all over the ten quarters, when I attain to the path of Buddha, may I not accomplish the perfect knowledge.

我至成佛道　名聲超十方　究竟靡所聞　誓不成正覺

4. May I become the teacher of gods and men, having sought for the highest path, by generosity, deep and right meditation, pure wisdom and practising the pure practice (Brahmakaryâ)[a].

離欲深正念　淨慧修梵行　志求無上道　為諸天人師

5. The great light produced by the spiritual power (of the Tathâgata) shines over unlimited countries, and destroys the darkness of three (kinds of) defilements, and saves all beings from misfortune.

神力演大光　普照無際土　消除三垢冥　明濟眾厄難

6. Opening his eye of wisdom, he (the Tathâgata) destroys that darkness of ignorance like a blind man. Shutting up all the evil paths, he opens the gate of the good state

開彼智慧眼　滅此昏盲闇　閉塞諸惡道　通達善趣門

---

a Bodhiruki translates this verse as follows: 'If I should still seek for the object of desire, after I left home in order to advance towards the highest path, and should not practise meditation and wisdom, may I not become the charioteer (of men whose passions are to be tamed) and the teacher of gods and men.'

7. Having accomplished his actions, his powerful light is brilliant over the ten quarters; so that the sun and moon do not shine, and the light of the sky becomes invisible.

8. Opening the treasury of the law for the sake of a multitude, he widely distributes the jewels of merit; and in the midst of a large assembly, he constantly preaches the law as a lion roars.

9. Having worshipped all Buddhas, he has made the stocks of merit perfect. His prayers and wisdom having been perfect, he has become the hero of the three worlds.

10. Like Buddha, who is possessed of unimpeded wisdom, and understands and shines over everything, may I also be possessed of the power of action and wisdom, and equal this highest worthy.

11. If this prayer should ever be fulfilled, the great-thousand (world) would be moved, and the heavenly beings in the sky would shower down the wonderful and precious flowers.

功[7]祚成滿足
威曜朗十方
日月戢重暉
天光隱不現
爲[8]衆開法藏
廣施功德寶
常於大衆中
說法師子吼
供[9]養一切佛
具足衆德本
願慧悉成滿
得爲三界雄
如[10]佛無礙智
通達靡不照
願我功慧力
等此最勝尊
斯[11]願若剋果
大千應感動
虛空諸天人
當雨珍妙華

12 Buddha spoke to Ânanda: When the Bhikshu Dharmâkara spoke these verses, the whole earth was shaken in six different ways, and the heaven showered the wonderful flowers over it, and there was music spontaneously in the sky, in which this praise was produced 'Thou wilt certainly accomplish the highest perfect knowledge*.'

佛告阿難法藏比丘說此頌已應時普地六種震動天雨妙華以散其上自然音樂空中讚言決定必成無上正覺

3 Sanskrit Text, Chapter 31, pages 49-54.

1 There are Buddha-countries in the eastern quarter, the number of which equals the sand of the river Ganges¹ The company of Bodhisattvas of those countries goes to see Buddha Amitâyu.

2 Thus also in the south, west, north, zenith, and nadir, and in the four corners (there are the same). The company of Bodhisattvas of those countries goes to see Buddha Amitâyu

東方諸佛國　其數如恒沙
彼土菩薩眾　往覲無量覺
南西北四維　上下亦復然
彼土菩薩眾　往覲無量覺

* In the fourth and fifth of the five Chinese translations which [...] istence, this part is translated as a verse, as it is in Sanskrit; wh[...] and second translations, these 12 verses are altogether left out.

8. Then the Lord Amitâyu changes his countenance and smiles, and shines over the countries of the ten quarters, producing innumerable (rays of) light from his mouth. (See verse 11.)

9. Turning back his light, he causes it to turn round his body three times and to enter into (his person) from the top of his head. All the assembly of gods and men are dancing with joy (See verse 12.)

10 The noble-minded Avalokitesvara, making his cloak proper, touching the ground with his head, asks him, saying: 'Why dost thou smile? Pray, tell me thy thoughts'

11. The Brahma-voice (of Buddha) is like thunder, and produces a wonderful ringing sound, with eight different kinds of sound (saying): 'I shall give prophecy to the Bodhisattvas, and tell thee now;—do thou listen carefully!

12. 'I know thoroughly well the wishes of those noble-minded ones who come from the ten quarters, that they seek for a pure and adorned country, and that, having received prophecy, they will become Buddha

應[8]時無量尊
動容發欣笑
口出無數光
遍照十方國
迴[9]光圍繞身
三而從頂入
一切天人眾
踊躍皆歡喜
大[10]士觀世音
整服稽首問
白佛何緣笑
唯然願說意
梵[11]聲猶雷震
八音暢妙響
當授菩薩記
今說仁諦聽
十[12]方來正士
吾悉知彼願
志求嚴淨土
受決當作佛

13. 'Understanding all the dharmas as dreams, illusions, and ringing-sounds, they will make their excellent prayers fulfilled, and certainly accomplish such a country as this.

14. 'Knowing the dharmas as lightnings and shadows, they will accomplish the path of a Bodhisattva, and make the stocks of merit perfect, and having received prophecy, they will become Buddha.

15. 'Understanding the nature of all the dharmas as empty and without self, they simply seek for a pure Buddha-country, and will certainly accomplish such a country as this.'

16. The other Buddhas speak to their Bodhisattvas and cause them to go and see Buddha (Amitâyu) of Sukhâvatî (saying): 'Hearing his law you should willingly receive and practise it, and quickly obtain the pure place (like Sukhâvatî).

17. 'When you arrive at that pure and adorned country, you will at once obtain supernatural power, and certainly receive prophecy from the Lord Amitâyu, and attain to the state of "being equal to Buddha *."

[13] 覺了一切法 猶如夢幻響 滿足諸妙願 必成如是剎 [14] 知法如電影
究竟菩薩道 具諸功德本 受決當作佛 [15] 通達諸法性 一切空無我
專求淨佛土 必成如是剎 [16] 諸佛告菩薩 令覲安養佛 聞法樂受行
疾得清淨處 [17] 至彼嚴淨國 便速得神通 必於無量尊 受記成等覺

* 等覺 tan kio, lit. equally enlightened. This term is generally explained with Ekagâtibaddha, or he who is bound by one birth only; see verse 18 in Sanskrit.

18. 'If beings, having heard his name, wish to be born in his country, they will arrive there, through the power of the former prayers of that Buddha (Amitâyu), and spontaneously attain to the state of "never returning again" (Avaivartya).'

[18] 其佛本願力
自致不退轉
普念度一切
飛化徧諸剎

19. The Bodhisattvas raise their prayers, and pray that their own country should have no difference (from Sukhâvatî). They think intensely of saving all beings and making their name to be heard in the ten quarters.

聞名欲往生
[19] 菩薩興至願
名顯達十方
恭敬歡喜去

20. Having worshipped a million of Tathâgatas, and gone to their countries through their supernatural power, and joyfully worshipped them there, they (the Bodhisattvas) return to the country of Sukhâvatî.

皆悉到彼國
願己國無異
[20] 奉事億如來
還到安養國

4. Sanskrit Text, Chapter 44, pages 73-75

1. If men have no stock of merit, they are not able to hear this Sûtra. Those who are pure and keep the moral precepts, are able to hear the right law.

[1] 若人無善本
不得聞此經
清淨有戒者
乃獲聞正法

2. Those who have formerly seen Bhagavat, are able to believe in this matter. They will hear and practise (this law) respectfully and without pride, and skip for great joy.

曾[2]更見世尊
難以信此法
譬如從生盲
唯佛獨明了

3. Those who are either proud, vicious, or neglectful, find it difficult to believe in this law. Those who have seen Buddhas in former life, willingly hear such a teaching as this.

則能信此事
宿世見諸佛
欲行開導人
假[6]使一切人

4. Neither *S*râvakas nor Bodhisattvas are able to understand the holy thought (of Buddha), because it is just as if a man, blind from his birth, wishes to go to lead others.

謙敬聞奉行
樂聽如是教
如[4]來智慧海
具足皆得道

5. The sea of wisdom of the Tathâgata is deep and wide, unlimited and bottomless, so that neither *S*râvakas nor Pratyekabuddhas can measure it, but Buddha only understands it clearly.

踊躍大歡喜
聲[5]聞或菩薩
深廣無涯底
淨慧知本空

6, 7. Let even all men, who may have perfectly attained to the Bodhi, and understood the sublime truth, being possessed of pure wisdom, think of the wisdom of Buddha for a million

憍[3]慢弊懈怠
莫能究聖心
二乘非所測
億劫思佛智

of kalpas, and use their utmost power in their speech and explanation, yet they will not know the unlimitedness of Buddha's wisdom till the end of their life. Thus it is perfectly pure.

8. This life is very difficult to be obtained, and the appearance of Buddha in the world is also difficult to be met with, and men who have faith and wisdom are difficult (to be found); so that if they hear (this law), they must diligently seek for it.

9. If they, having heard the law, do not forget it, and having perceived (its deep meaning) respect it, and having obtained (its essence) rejoice greatly, they are my good and intimate friends. Therefore they ought to raise their own thoughts (for obtaining the Bodhi).

10. Even if the world is full of fire, yet they ought certainly to pass through it, and seek to hear the law. They will then certainly attain to the path of Buddha, and widely save (those who are in) the stream of birth and death.

窮[7]力極講說 盡壽猶不知 佛慧無邊際 如是致清淨

壽[8]命甚難得 佛世亦難值 人有信慧難 若聞精進求

聞[9]法能不忘 見敬得大慶 則我善親友 是故當發意

設[10]滿世界火 必過要聞法 會當成佛道 廣濟生死流

APPENDIX II.

THE SMALLER SUKHÂVATÎ-VYÛHA[1].

॥ नमः सर्वज्ञाय ॥

एवं मया श्रुतं। एकस्मिन्समये भगवाञ्छ्रावस्त्यां विहरति स्म जेतवनेऽनाथपिंडदस्यारामे महता भिक्षुसंघेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैरभिज्ञानाभिज्ञातैः स्थविरैर्महाश्रावकैः सर्वैरर्हद्भिः। तद्यथा स्थविरेण च शारिपुत्रेण महामौद्गल्यायनेन च महाकाश्यपेन च महाकप्फिणेन च महाकात्यायनेन च महाकौष्ठिलेन च रेवतेन च शुद्धिपंथकेन च नंदेन चानंदेन च राहुलेन च गवांपतिना च भरद्वाजेन च कालोदयिना च वक्कुलेन चानिरुद्धेन च। एतैश्चान्यैश्च संवहुलैर्महाश्रावकैः संवहुलैश्च वोधिसत्त्वैर्महासत्त्वैः। तद्यथा मंजुश्रिया च कुमारभूतेनाजितेन च वोधिसत्त्वेन गंधहस्तिना च वोधिसत्त्वेन नित्योद्युक्तेन च वोधिसत्त्वेनानिक्षिप्तधुरेण च वोधिसत्त्वेन। एतैश्चान्यैश्च संवहुलैर्वोधिसत्त्वैर्महासत्त्वैः। शक्रेण च देवानामिंद्रेण ब्रह्मणा च सहांपतिना। एतैश्चान्यैश्च संवहुलैर्देवपुत्रनयुतशतसहस्रैः ॥१॥

[1] See Journal of the Royal Asiatic Society, 1880, pp. 181-186, Selected Essays, vol. ii, p. 349.

मन्याः । न पुनर्नैवं द्रष्टव्यं । तत्कस्माद्धेतोः । नामापि शारिपुत्र तत्र बुद्धक्षेत्रे निरयाणां नास्ति तिर्यग्योनीनां यमलोकस्य नास्ति । ते पुनः पक्षिसंघास्तेनामिताभेन तथागतेन निर्मिता धर्मशब्दं निश्चारयन्ति । एवंरूपैः शारिपुत्र बुद्धक्षेत्रगुणव्यूहैः समलंकृतं तद्बुद्धक्षेत्रं ॥ ६ ॥

पुनरपरं शारिपुत्र तत्र बुद्धक्षेत्रे तासां च तालपङ्क्तीनां तेषां च किङ्किणीजालानां वातेरितानां वल्गुर्मनोज्ञः शब्दो निश्चरति । तद्यथापि नाम शारिपुत्र कोटीशतसहस्राङ्गिकस्य दिव्यस्य तूर्यस्य चार्यैः संप्रवादितस्य वल्गुर्मनोज्ञः शब्दो निश्चरति एवमेव शारिपुत्र तासां च तालपङ्क्तीनां तेषां च किङ्किणीजालानां वातेरितानां वल्गुर्मनोज्ञः शब्दो निश्चरति । तत्र तेषां मनुष्याणां तं शब्दं श्रुत्वा बुद्धानुस्मृतिः काये संतिष्ठति धर्मानुस्मृतिः काये संतिष्ठति संघानुस्मृतिः काये संतिष्ठति । एवंरूपैः शारिपुत्र बुद्धक्षेत्रगुणव्यूहैः समलंकृतं तद्बुद्धक्षेत्रं ॥ ७ ॥

तत्किं मन्यसे शारिपुत्र केन कारणेन स तथागतोऽमितायुर्नामोच्यते । तस्य खलु पुनः शारिपुत्र तथागतस्य तेषां च मनुष्याणामपरिमितमायुःप्रमाणं । तेन कारणेन स तथागतोऽमितायुर्नामोच्यते । तस्य च शारिपुत्र तथागतस्य दश कल्पा अनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य ॥ ८ ॥

तत्किं मन्यसे शारिपुत्र केन कारणेन स तथागतोऽमिताभो नामोच्यते । तस्य खलु पुनः शारिपुत्र तथागतस्याभा अप्रतिहता सर्वबुद्धक्षेत्रेषु । तेन कारणेन स तथागतोऽमिताभो नामोच्यते

रत्नस्य। तासु च पुष्करिणीषु संति पद्मानि जातानि नीलानि नीलवर्णानि नीलनिर्भासानि नीलनिदर्शनानि। पीतानि पीतवर्णानि पीतनिर्भासानि पीतनिदर्शनानि। लोहितानि लोहितवर्णानि लोहितनिर्भासानि लोहितनिदर्शनानि। अवदातान्यवदातवर्णान्यवदातनिर्भासान्यवदातनिदर्शनानि। चित्राणि चित्रवर्णानि चित्रनिर्भासानि चित्रनिदर्शनानि शकटचक्रप्रमाणपरिणाहानि। एवंरूपैः शारिपुत्र बुद्धक्षेत्रगुणव्यूहैः समलंकृतं तद्बुद्धक्षेत्रं ॥४॥

पुनरपरं शारिपुत्र तत्र बुद्धक्षेत्रे नित्यप्रवादितानि दिव्यानि तूर्याणि सुवर्णवर्णा च महापृथिवी रमणीया। तत्र च बुद्धक्षेत्रे त्रिष्कृत्वो रात्रौ त्रिष्कृत्वो दिवसस्य पुष्पवर्षं प्रवर्षति दिव्यानां मांदारवपुष्पाणां। तत्र ये सत्त्वा उपपन्नास्त एकेन पुरोभक्तेन कोटिशतसहस्रं बुद्धानां वंदंत्यन्याँल्लोकधातून्गत्वा। एकैकं च तथागतं कोटिशतसहस्राभिः पुष्पवृष्टिभिरभ्यवकीर्य पुनरपि तामेव लोकधातुमागच्छंति दिवाविहाराय। एवंरूपैः शारिपुत्र बुद्धक्षेत्रगुणव्यूहैः समलंकृतं तद्बुद्धक्षेत्रं ॥५॥

पुनरपरं शारिपुत्र तत्र बुद्धक्षेत्रे संति हंसाः क्रौंचा मयूराश्च। ते त्रिष्कृत्वो रात्रौ त्रिष्कृत्वो दिवसस्य संनिपत्य संगीतिं कुर्वंति स्म स्वकस्वकानि च रुतानि प्रव्याहरंति। तेषां प्रव्याहरतामिंद्रियबलबोध्यंगशब्दो निश्चरति। तत्र तेषां मनुष्याणां तं शब्दं श्रुत्वा बुद्धमनसिकार उत्पद्यते धर्ममनसिकार उत्पद्यते संघमनसिकार उत्पद्यते ॥ तत्किं मन्यसे शारिपुत्र तिर्यग्योनिगतास्ते

सत्त्वाः । न पुनरेवं द्रष्टव्यं । तत्कस्माद्धेतोः । नामापि शारिपुत्र तत्र बुद्धक्षेत्रे निरयाणां नास्ति तिर्यग्योनीनां यमलोकस्य नास्ति । ते पुनः पक्षिसंघास्तेनामितायुषा तथागतेन निर्मिता धर्मशब्दं निश्चारयंति । एवंरूपैः शारिपुत्र बुद्धक्षेत्रगुणव्यूहैः समलंकृतं तद्बुद्धक्षेत्रं ॥६॥

पुनरपरं शारिपुत्र तत्र बुद्धक्षेत्रे तासां च तालपंक्तीनां तेषां च किंकिणीजालानां वातेरितानां वल्गुर्मनोज्ञः शब्दो निश्चरति । तद्यथापि नाम शारिपुत्र कोटिशतसहस्रांगिकस्य दिव्यस्य तूर्यस्य चार्यैः संप्रवादितस्य वल्गुर्मनोज्ञः शब्दो निश्चरति एवमेव शारिपुत्र तासां च तालपंक्तीनां तेषां च किंकिणीजालानां वातेरितानां वल्गुर्मनोज्ञः शब्दो निश्चरति । तत्र तेषां मनुष्याणां तं शब्दं श्रुत्वा बुद्धानुस्मृतिः काये संतिष्ठति धर्मानुस्मृतिः काये संतिष्ठति संघानुस्मृतिः काये संतिष्ठति । एवंरूपैः शारिपुत्र बुद्धक्षेत्रगुणव्यूहैः समलंकृतं तद्बुद्धक्षेत्रं ॥७॥

तत्किं मन्यसे शारिपुत्र केन कारणेन स तथागतोऽमितायुर्नामोच्यते । तस्य खलु पुनः शारिपुत्र तथागतस्य तेषां च मनुष्याणामपरिमितमायुःप्रमाणं । तेन कारणेन स तथागतोऽमितायुर्नामोच्यते । तस्य च शारिपुत्र तथागतस्य दश कल्पा अनुत्तरां सम्यक्संबोधिमभिसंबुद्धस्य ॥८॥

तत्किं मन्यसे शारिपुत्र केन कारणेन स तथागतोऽमिताभो नामोच्यते । तस्य खलु पुनः शारिपुत्र तथागतस्याभाप्रतिहता सर्वबुद्धक्षेत्रेषु । तेन कारणेन स तथागतोऽमिताभो नामोच्यते ॥

तस्य च शारिपुत्र तथागतस्याप्रमेयः श्रावकसंघो येषां न सुकरं प्रमाणमाख्यातुं शुद्धानामर्हतां। एवंरूपैः शारिपुत्र बुद्धक्षेत्रगुणव्यूहैः समलंकृतं तद्बुद्धक्षेत्रं ॥९॥

पुनरपरं शारिपुत्र येऽमितायुषस्तथागतस्य बुद्धक्षेत्रे सत्त्वा उपपन्नाः शुद्धा बोधिसत्त्वा अविनिवर्तनीया एकजातिप्रतिबद्धास्तेषां शारिपुत्र बोधिसत्त्वानां न सुकरं प्रमाणमाख्यातुमन्यत्राप्रमेयासंख्येया इति संख्यां गच्छंति ॥ तत्र खलु पुनः शारिपुत्र बुद्धक्षेत्रे सत्त्वैः प्रणिधानं कर्तव्यं। तत्कस्माद्धेतोः। यत्र हि नाम तथारूपैः सत्पुरुषैः सह समवधानं भवति। नावरमात्रकेण शारिपुत्र कुशलमूलेनामितायुषस्तथागतस्य बुद्धक्षेत्रे सत्त्वा उपपद्यंते। यः कश्चिच्छारिपुत्र कुलपुत्रो वा कुलदुहिता वा तस्य भगवतोऽमितायुषस्तथागतस्य नामधेयं श्रोष्यति श्रुत्वा च मनसिकरिष्यति एकरात्रं वा द्विरात्रं वा त्रिरात्रं वा चतूरात्रं वा पंचरात्रं वा षड्रात्रं वा सप्तरात्रं वाविक्षिप्तचित्तो मनसिकरिष्यति यदा स कुलपुत्रो वा कुलदुहिता वा कालं करिष्यति तस्य कालं कुर्वतः सोऽमितायुस्तथागतः श्रावकसंघपरिवृतो बोधिसत्त्वगणपुरस्कृतः पुरतः स्थास्यति सोऽविपर्यस्तचित्तः कालं करिष्यति च। स कालं कृत्वा तस्मिन्नेवामितायुषस्तथागतस्य बुद्धक्षेत्रे सुखावत्यां लोकधातावुपपत्स्यते। तस्मात्तर्हि शारिपुत्र इदमर्थवशं संपश्यमान एवं वदामि सत्कृत्य कुलपुत्रेण वा कुलदुहित्रा वा तत्र बुद्धक्षेत्रे चित्तप्रणिधानं कर्तव्यं ॥१०॥

तद्यथापि नाम शारिपुत्र अहमेतर्हि तां परिकीर्तयामि एवमेव

शारिपुत्र पूर्वस्यां दिश्यक्षोभ्यो नाम तथागतो मेरुध्वजो नाम तथागतो महामेरुर्नाम तथागतो मेरुप्रभासो नाम तथागतो मंजुध्वजो नाम तथागत एवंप्रमुखाः शारिपुत्र पूर्वस्यां दिशि गंगानदीवालुकोपमा बुद्धा भगवंतः स्वकस्वकानि बुद्धक्षेत्राणि जिह्वेंद्रियेण संच्छादयित्वा निर्वेठनं कुर्वंति। प्रतीयथ यूयमिदमचिंत्यगुणपरिकीर्तनं सर्वबुद्धपरिग्रहं नाम धर्मपर्यायं ॥११॥

एवं दक्षिणस्यां दिशि चंद्रसूर्यप्रदीपो नाम तथागतो यशःप्रभो नाम तथागतो महार्चिस्कंधो नाम तथागतो मेरुप्रदीपो नाम तथागतोऽनंतवीर्यो नाम तथागत एवंप्रमुखाः शारिपुत्र दक्षिणस्यां दिशि गंगानदीवालुकोपमा बुद्धा भगवंतः स्वकस्वकानि बुद्धक्षेत्राणि जिह्वेंद्रियेण संच्छादयित्वा निर्वेठनं कुर्वंति। प्रतीयथ यूयमिदमचिंत्यगुणपरिकीर्तनं सर्वबुद्धपरिग्रहं नाम धर्मपर्यायं ॥१२॥

एवं पश्चिमायां दिश्यमितायुर्नाम तथागतोऽमितस्कंधो नाम तथागतोऽमितध्वजो नाम तथागतो महाप्रभो नाम तथागतो महारत्नकेतुर्नाम तथागतः शुद्धरश्मिप्रभो नाम तथागत एवंप्रमुखाः शारिपुत्र पश्चिमायां दिशि गंगानदीवालुकोपमा बुद्धा भगवंतः स्वकस्वकानि बुद्धक्षेत्राणि जिह्वेंद्रियेण संच्छादयित्वा निर्वेठनं कुर्वंति। प्रतीयथ यूयमिदमचिंत्यगुणपरिकीर्तनं सर्वबुद्धपरिग्रहं नाम धर्मपर्यायं ॥१३॥

एवमुत्तरायां दिशि महार्चिस्कंधो नाम तथागतो वैश्वानरनिर्घोषो नाम तथागतो दुंदुभिस्वरनिर्घोषो नाम तथागतो

दुष्प्रधर्षो नाम तथागत आदित्यसंभवो नाम तथागतो जलेनिप्रभो नाम तथागतः प्रभाकरो नाम तथागत एवंप्रमुखा शारिपुत्रोत्तरायां दिशि गंगानदीवालुकोपमा बुद्धा भगवंतः स्वकस्वकानि बुद्धक्षेत्राणि जिह्वेंद्रियेण संच्छादयित्वा निर्वेठनं कुर्वंति। प्रतीयथ यूयमिदमचिंत्यगुणपरिकीर्तनं सर्वबुद्धपरिग्रहं नाम धर्मपर्यायं ॥१४॥

एवमधस्तायां दिशि सिंहो नाम तथागतो यशो नाम तथागतो यशःप्रभासो नाम तथागतो धर्मो नाम तथागतो धर्मधरो नाम तथागतो धर्मध्वजो नाम तथागत एवंप्रमुखाः शारिपुत्राधस्तायां दिशि गंगानदीवालुकोपमा बुद्धा भगवंतः स्वकस्वकानि बुद्धक्षेत्राणि जिह्वेंद्रियेण संच्छादयित्वा निर्वेठनं कुर्वंति। प्रतीयथ यूयमिदमचिंत्यगुणपरिकीर्तनं सर्वबुद्धपरिग्रहं नाम धर्मपर्यायं ॥१५॥

एवमुपरिष्टायां दिशि ब्रह्मघोषो नाम तथागतो नक्षत्रराजो नाम तथागत इंद्रकेतुध्वजराजो नाम तथागतो गंधोत्तमो नाम तथागतो गंधप्रभासो नाम तथागतो महार्चिस्कंधो नाम तथागतो रत्नकुसुमसंपुष्पितगात्रो नाम तथागतः सालेंद्रराजो नाम तथागतो रत्नोत्पलश्रीर्नाम तथागतः सर्वार्थदर्शो नाम तथागतः सुमेरुकल्पो नाम तथागत एवंप्रमुखाः शारिपुत्रोपरिष्टायां दिशि गंगानदीवालुकोपमा बुद्धा भगवंतः स्वकस्वकानि बुद्धक्षेत्राणि जिह्वेंद्रियेण संच्छादयित्वा निर्वेठनं कुर्वंति। प्रतीयथ यूयमिदमचिंत्यगुणपरिकीर्तनं सर्वबुद्धपरिग्रहं नाम धर्मपर्यायं ॥१६॥

तत्किं मन्यसे शारिपुत्र केन कारणेनायं धर्मपर्यायः सर्वबुद्धपरिग्रहो नामोच्यते। ये केचिच्छारिपुत्र कुलपुत्रा वा कुलदुहितरो वास्य धर्मपर्यायस्य नामधेयं श्रोष्यंति तेषां च बुद्धानां भगवतां नामधेयं धारयिष्यंति सर्वे ते बुद्धपरिगृहीता भविष्यंत्यविनिवर्तनीयाश्च भविष्यंत्यनुत्तरायां सम्यक्संबोधौ। तस्मात्तर्हि शारिपुत्र श्रद्दधाध्वं प्रतीयथ माकांक्षथ मम च तेषां च बुद्धानां भगवतां। ये केचिच्छारिपुत्र कुलपुत्रा वा कुलदुहितरो वा तस्य भगवतोऽमितायुषस्तथागतस्य बुद्धक्षेत्रे चित्तप्रणिधानं करिष्यंति कृतं वा कुर्वंति वा सर्वे तेऽविनिवर्तनीया भविष्यंत्यनुत्तरायां सम्यक्संबोधौ तत्र च बुद्धक्षेत्र उपपत्स्यंत्युपपन्ना वोत्पद्यंति वा। तस्मात्तर्हि शारिपुत्र श्राद्धैः कुलपुत्रैः कुलदुहितृभिश्च तत्र बुद्धक्षेत्रे चित्तप्रणिधिरुत्पादयितव्यः ॥१७॥

तद्यथापि नाम शारिपुत्राहमेतर्हि तेषां बुद्धानां भगवतामेवमचिंत्यगुणान्परिकीर्तयामि एवमेव शारिपुत्र ममापि ते बुद्धा भगवंत एवमचिंत्यगुणान्परिकीर्तयंति। सुदुष्करं भगवता शाक्यमुनिना शाक्याधिराजेन कृतं। सहायां लोकधातावनुत्तरां सम्यक्संबोधिमभिसंबुध्य सर्वलोकविप्रत्ययनीयो धर्मो देशितः कल्पकषाये सत्त्वकषाये दृष्टिकषाय आयुष्कषाये क्लेशकषाये॥१८॥

तन्ममापि शारिपुत्र परमदुष्करं यन्मया सहायां लोकधातावनुत्तरां सम्यक्संबोधिमभिसंबुध्य सर्वलोकविप्रत्ययनीयो धर्मो देशितः सत्त्वकषाये दृष्टिकषाये क्लेशकषाय आयुष्कषाये कल्पकषाये ॥१९॥

इदमवोचद्भगवानात्तमनाः। आयुष्मांश्छारिपुत्रस्ते च भिक्षवस्ते च बोधिसत्त्वाः सदेवमानुषासुरगंधर्वश्च लोको भगवतो भाषितमभ्यनंदन् ॥२०॥

॥ सुखावतीव्यूहो नाम महायानसूत्रं ॥